**आरण्यकम्** (XXIII/2) **सितम्बर 2015** ISSN 0975 - 0061
अर्धवार्षिकं संस्कृतशोधपत्रम् आर.एन.आई. सं.58951/94

## संस्कृतप्रसारपरिषद्, आरा

### प्रकाशनम्

1. मेघदूतम् (सभूमिका-हिन्दीपद्यानुवादसहितम्)
   - स्व. पण्डित कमलाकान्त उपाध्यायः
   15 रूप्यकाणि
2. भोजपुरी नीतिसतक (भर्तृहरि 'नीतिशतक'स्य भोजपुरी-पद्यानुवादः)
   -श्री देवकुमार मिश्रः 'अलमस्त'
   15 रूप्यकाणि
3. पण्डित दीनदयाल उपाध्याय के 'एकात्ममानवदर्शन' की मीमांसा
   - श्री नर्मदेश्वर ओझा
   15 रूप्यकाणि
4. माण्डूक्योपनिषद्-'नलिन-भाष्य' - पं. जगदीश्वर प्रसाद मिश्र 'नलिन'
   35 रूप्यकाणि
5. भरतचरितम् (महाकाव्यम्) - स्व. भवानीदत्त शर्मा
   51 रूप्यकाणि
6. राष्ट्रियता : सांस्कृतिक अवधारणा - श्री नर्मदेश्वर ओझा
   51 रूप्यकाणि
7. संस्कृतनिबन्धसञ्चयनम् - पं. व्रजभूषण मिश्र 'आक्रान्तः'
   41 रूप्यकाणि
8. ईशावास्योपनिषद् एवं केनोपनिषद्-'नलिन-भाष्य'
   - श्री जगदीश्वर प्रसाद मिश्र 'नलिन'
   51 रूप्यकाणि
9. आध्यात्मिकनिबन्धसंग्रह - श्री जगदीश्वर प्रसाद मिश्र 'नलिन'
   51 रूप्यकाणि
10. उपेन्द्रविज्ञानदर्शनम् (वेदान्तग्रन्थः) - स्व. पं. उपेन्द्रनारायणदत्त शर्मा
    41 रूप्यकाणि
11. भावनाविलासशतकम् - स्व. पं. उपेन्द्रनारायणदत्त शर्मा
    21 रूप्यकाणि
12. हनुमच्चरितम् - स्व. पं. व्रजभूषणमिश्र 'आक्रान्तः'
    51 रूप्यकाणि
13. उपनिषदों की भूमिका - पं. जगदीश्वर प्रसाद मिश्र 'नलिन'
    51 रूप्यकाणि
14. महाभारतसारसंग्रहः (प्रकाश्यः) - स्व. पण्डित वचन मिश्रः
15. चरितरत्नत्रयी - स्व. पं. व्रजभूषणमिश्र 'आक्रान्तः'
    51 रूप्यकाणि
16. जगन्नाथचरितम् - डॉ. बनमाली बिश्वालः
    60 रूप्यकाणि
17. कृत्-प्रत्ययविश्लेषण - डॉ. गोपबन्धु मिश्रः
    204 रूप्यकाणि

# आरण्यकम्

## अर्धवार्षिकं संस्कृतशोधपत्रम्

### संस्कृतप्रसारपरिषद्
### आरा (विहारः)




**त्रयोविंशं वर्षम्, द्वितीयोऽङ्कः**
**सितम्बर 2015**

# आरण्यकम्

संस्कृतप्रसारपरिषदः अर्धवार्षिकं शोधपत्रम्

**वर्षाङ्कौ - त्रयोविंशं वर्षम्, द्वितीयोऽङ्कः**

**आश्विनः, वि.सं.२०७३**

**सितम्बर, २०१५**

**प्रतिवर्षं प्रकाशनकालः**
**चैत्रः, आश्विनः-विक्रमाब्दः**
**मार्च, सितम्बर**

*प्रत्यङ्कम् - ५० रूप्यकाणि* *वार्षिकं शुल्कं १०० रूप्यकाणि*
*संयुक्ताङ्कः - १०० रूप्यकाणि*


**परामर्शदात्री समितिः**

डॉ. हरिहर झा, दरभङ्गा
डॉ. उमाशङ्कर शर्मा 'ऋषिः', पटना
डॉ. भागीरथ त्रिपाठी 'वागीशः शास्त्री', वाराणसी
डॉ. राय अश्विनी कुमारः, बोधगया

संस्थापकः
**स्व. पण्डित व्रजभूषण मिश्र 'आक्रान्तः'**



सम्पादकः
**प्रो.गोपबन्धु मिश्रः**
संस्कृतविभागः
काशी हिन्दू विश्वविद्यालयः, वाराणसी
भूतपूर्वः अतिथ्यध्यापकः (संस्कृतम्)
सोर्बोन नोवेल विश्वविद्यालयः, पारिस (फ्रान्स)

सह-सम्पादकः
**डॉ. सुनीलकुमार प्रधानः**
Email-sunilkumarp435@gmail.com



प्रकाशिका
**संस्कृतप्रसारपरिषद्**
रामेश्वरलीलासदनम्
महावीरस्थानम्
मौलाबाग, आरा (विहारः) 802301

संस्कृतप्रसारपरिषद्, आरा पक्षतः प्रो. गोपबन्धु मिश्रेण, दी महावीर प्रेस, बी.20/44, भेलूपुर, वाराणसी इत्याख्ये मुद्रणालये मुद्रितं प्रकाशितं च।

**प्रो. गोपबन्धु मिश्रः**
सम्पादकः

# सम्पादकीयम्

**अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते।** (ईशोप. 11)

इत्यत्र अविद्यया मृत्योस्तरणं तदनु विद्यया अमृतत्वावाप्तिः प्रथिता। तस्यामेवोपनिषदि **विनाशेन मृत्युं तीर्त्वा सम्भूत्याऽमृतमश्नुते** (ईशोप. 14) इति विनाशस्य सम्भूतेश्च विषयः प्रोक्तः। **तेन त्यक्तेन भुञ्जीथाः** (ईशोप.1) इत्यत्र त्यागभूमेः महत्त्वप्रदर्शनपुरःसरं भोगप्रसक्तिः पुरस्कृता।

**श्रेयश्च प्रेयश्च मनुष्यमेत-**
**स्तौ सम्परीत्य विविनक्ति धीरः।**
**श्रेया हि धीरोऽभि प्रेयसो वृणीते**
**प्रेयो मन्दो योगक्षेमाद् वृणीते॥** (कठोप.2/2)

इत्यत्र श्रेयसः महत्त्वदर्शनप्रसङ्गे प्रेयसः श्रेयसा सहैव सहावस्थितिः समुदीरिता। गीतायाम्–

**अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम्।**
**परं भावमजानन्तो मम भूतमहेश्वरम्॥** (गीता 9/11)

इति मूढानां भूतमहेश्वररूपपरकभावज्ञानाभावं प्रदर्शयता भगवता तेषां भगवतः मानुषतन्वाश्रितत्वज्ञानं परामृष्टम्।

वाक्यपदीये शब्दस्य सत्यस्वरूपज्ञानाय प्रवर्तमानानां जनानां कृतेऽपि असत्ये वर्त्मनि स्थिताः व्याकरणगताः प्रक्रियारूपाः उपायाः अवश्यमवलम्बनीयाः इत्युक्तम्,तद्यथा–

**उपायाः शिक्षमाणानां बालानामपलालनाः।**
**असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते॥** (वा.प.2/238)

गीतायां पुनः आत्मनः अविभक्तं रूपं व्याचक्षाणेन भगवता निखिलेष्वपि भूतेषु विभक्तवत् आत्मनः स्थितिः परिपोषिता। तद्यथा–

**अविभक्तं च भूतेषु विभक्तमिव च स्थितम्।** (गीता 13/16)

उपरिकथितेषु विशिष्टेषु प्रयोगेषु विद्याविद्ये, त्यागभोगौ, श्रेयःप्रेयसी, ज्ञानाज्ञाने, सत्यासत्ये, अविभक्तविभक्तौ इति परस्परं विरोधिनोः भावयोः सहावस्थितिः स्वीकृतेति प्राचीनायाः भारतीयाया मनीषायाः वैशिष्ट्यम्, अर्थात् आदौ स्वविरोधिनः सहावस्थानस्वीकरणेन सर्वात्मना शाश्वतिकविरोधमपि आचरतोः अहिनकुलयोरपि अस्मिन् धरातले समकालं स्थितेः यत् नैसर्गिकं वैशिष्ट्यं तत् प्रति श्रद्धाभावः अभिव्यक्तः एव। अनया रीत्या स्वात्मनः भिन्नां भाषाम् अपरं च वेशं विषमं च भोजनादि व्यवहरतां समेषां प्राणिनां कृते इयं धरा विद्यते इति समभावोदयः सुतरां शक्यः एव।



किं च अत्रायं विवेकः– विद्याविद्ययोः, त्यागभोगयोः तथा च तद्वत् इतरयोः परस्परं विरोधिनोः सहावस्थितिस्वीकृतौ अपि तत्र अविद्यापेक्षया विद्यायाः, भोगापेक्षया त्यागस्य, अज्ञानापेक्षया ज्ञानस्य, प्रेयसोऽपेक्षया श्रेयसः, असत्यापेक्षया सत्यस्य, विभक्तापेक्षया अविभक्तस्य महत्त्वं साधयद्भिः मनीषिभिः परमताटस्थ्येन उभयोः विमर्शं विधाय तत्र अविद्या-भोगादीनां सीमानं न्यूनतां च समवगत्य तत्तदपेक्षया विद्या-त्यागादीनां महत्त्वं महत्त्वाधिष्ठिततया सेवितव्यत्वं प्रादर्शि। अत्र प्रश्नोऽयम् उदीयाद् यत् यः स्वयं भोगे सक्तः सः त्यागवैभवं कथं जानीयात् किं च तेन बोधेन त्यक्तमेव भोक्तव्यमिति मत्वा कथं प्रवर्तेत? एवमेव स्वयम् अहर्निशम् अविद्यायामन्तरे विद्यमानाः विद्यायाः परिचयं कथं प्राप्नुयुः, एवमेव असत्ये वर्त्मनि सरन्तः सत्यं परं कथं स्वीकुर्युः, तद्वत् सर्वथा मानुषीं तनुमेवाश्रितं परमात्मानं मत्वा मूढत्वं स्वयमाचरन्तः परं भावं कथं जानीयुः, तद्वच्च प्रेयोमार्गम् अनुगच्छन्तः श्रेयःस्वरूपं कथम् अनुसरेयुः इति? किं तर्हि उपर्युक्तमखिलं केवलं तटस्थस्य कस्यचित् अपरस्य द्वारा विद्याविद्ययोः ज्ञानाज्ञानयोरेवमन्ययोरपि वस्तुस्थितिसंकीर्तनमेवात्र तात्पर्यम्, उत एतयोः परस्परं विरुद्धयोः विवेकं विधाय तत्र पूर्वोत्तरपक्षविमर्शं सम्यग् अभिज्ञाय च पूर्वापेक्षया उत्तरस्य विद्या-ज्ञान-श्रेयोऽविभक्तादेः बलीयस्त्वं समीक्ष्य तत्र प्रवृत्तिरुद्दिष्टा? मन्ये, ताटस्थ्येन वास्तविकस्थितेरुल्लेखः तत्तत्स्थलगतोदीरणानाम् उद्दिष्टो न, अपि तु तत्र तत्र विद्या-ज्ञानादिमार्गान्वेषणाय यत्नो विधेय इति सार्वत्रिकं लक्ष्यमेव। अत एव ईशावास्योपनिषदि सत्यस्यापिहितमुखापावरणाय साक्षात् प्रेरकवाक्यम् उद्दिष्टं विद्यते, तद्यथा–

**हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्।**
**तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये॥** (ईशो. 15)

किं च कठोपनिषदि श्रेयःप्रेयसोः सहावस्थितौ प्रेयसः अपेक्षया श्रेयसः मार्गस्वीकरणे धीरस्य जनस्य विवेकः एव मार्गदर्शी इत्युक्त्वा ताटस्थ्यनिरसने किं च श्रेयसः अनुसरणे केवलं श्रेयःप्रेयसोः स्वरूपावगत्यपेक्षया तद्विवेचनपूर्वकं श्रेयःस्वीकरणाय धीरत्वस्य महत्त्वं सुतरां प्रदर्शितम्, तद्यथा–

**श्रेया हि धीरोऽभि प्रेयसो वृणीते।** (कठोप.2/2)

अतः सर्वेष्वेतेषु प्रसङ्गेषु अकृत्यात् निवृत्तये कृत्येषु च प्रवृत्तये सम्बद्धजनानां विवेकः एव प्रमाणमिति, अन्ततो गत्वा विवेचनबुद्धेः वैशिष्ट्यं सुतरां प्रदर्शितमस्ति।

उपर्युक्तः विवेकः संवर्धताम् इति मत्वा आरण्यकमिदं तदर्थं यतमानमस्ति।

विदुषां विशंवदः
गोपबन्धु मिश्र
सम्पादकः
आरण्यकम्

# सूचीपत्रम्


| विषयः | लेखकः | पृष्ठम् |
|---|---|---|
| १. महाभारते शिवरूपम् | प्रो. उमाशङ्करशर्मा 'ऋषिः'<br>प्राप्तराष्ट्रपतिपुरस्कारः<br>भूतपूर्वसंस्कृतविभागाध्यक्षः<br>पटनाविश्वविद्यालयः<br>वी/३३ विद्यापुरी, पटना-८०००२० | १ |
| २. फ्रांस्देशे संस्कृतस्य गृह-प्रवेशः अथवा शेजि (Antoine Léonard Chézy) महोपाध्यायचरितम् | प्रो. प्येर्-सिल्वें-फिल्योजः<br>संस्कृत-एमिरिटस प्रोफेसर<br>'इन्स्टिच्यूट द फ्रांस' सदस्यः<br>१३, रियू रामब्यूतो, पेरिस | ७ |
| ३. बङ्गीयकथासङ्ग्रहानुवादः मेघमल्लारः - एका समीक्षात्मका दृष्टिः | अरिजित् गुप्तः<br>आसिस्टैंट प्रोफेसर<br>द्विजेन्द्रलालमहाविद्यालयः<br>कृष्णागडः, नदिया (पं.ब.) | १५ |
| ४. शृङ्गारप्रकाशस्य प्राति-पादिके नवाचाराः | सर्वेशकुमारशाण्डिल्यः<br>शोधच्छात्रः, संस्कृतविभागः<br>काशीहिन्दूविश्वविद्यालयः<br>वाराणसी | २१ |
| ५. महाकवेः कालिदासस्य रचनासु अव्ययपदप्रयोग-सौष्ठवविमर्शः | वरदा वसा<br>आसिस्टैंट प्रोफेसर, संस्कृतपालिप्राकृतविभागः<br>महाराज सयाजिराओ विश्वविद्यालयः,<br>बडोदरा | ३७ |





| विषयः | लेखकः | पृष्ठम् |
|---|---|---|
| ६. पाणिनीयव्याकरणस्य प्रक्रियापद्धतिः | डॉ. चन्द्रमाधवसिंहः<br>प्रतिनियुक्तः व्याख्याता<br>राजकीयशिक्षकप्रशिक्षणमहाविद्यालयः<br>राँची (झारखण्डः) | ४५ |
| ७. विवेकानन्दविजयं स्वामी विवेकानन्दश्च | पूर्णचन्द्र उपाध्यायः<br>संस्कृतविभागाध्यक्षः<br>राजकीयमहाविद्यालयः, बून्दी,<br>राजस्थान | ४९ |
| ५. पातञ्जलमहाभाष्ये प्रयुक्तानां केषाञ्चिद् अनेकार्थिशब्दानां विवेचनम् | प्रतिभा आर्या<br>शोधच्छात्रा, संस्कृतविभागः<br>काशीहिन्दूविश्वविद्यालयः<br>वाराणसी | ५५ |


***

# महाभारते शिवरूपम्

**प्रो.उमाशङ्करशर्मा 'ऋषिः'**

सर्वविदितमिदं यन्महाभारतं सकलविषयावगाहि विश्वकोषरूपं ग्रन्थरत्नम्। 'यत्र भारते तत्र भारते' इत्याभाणको यथार्थ एव। तत्र धर्मविषये देवताराधनमपि ग्रन्थेऽस्मिन् सुप्रतिष्ठितमास्ते। तद्विषये महाभारतम् अत्युदारं पन्थानम् आश्रयते। नास्ति तत्र देवविशेषे पूर्वग्रहः। भीष्मपर्वगता भगवद्गीता स्पष्टमभिधत्ते–

**यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति।**
**तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम्॥** (भीष्म. 7.21)

अतएव भगवान् महादेवः शिवो वा परमात्मरूपो महाभारतेऽपि वन्दितः। तत्र विविधैः नामभिस्तस्य स्तुतिरभीष्टफलप्राप्तये कृता दृश्यते। शिवोऽद्भुतकर्मणां विधाता दुष्करस्य कर्मणः सम्पादकः। भगीरथो वनपर्वणि कैलासं गत्वा गङ्गां शिरसि धारणार्थं शिवं प्रार्थयते–

**कैलासं पर्वतं गत्वा तोषयामास शङ्करम्।**
**तपस्तीव्रमुपागम्य कालयोगेन केनचित्॥** (वनपर्व 108.26)

अनुशासनपर्वणि चतुर्दशेऽध्याये भगवान् श्रीकृष्णः शिवस्य विपुलं माहात्म्यं वर्णयति। याज्ञवल्क्यः व्यासश्च शिवाराधनया अतुलं यशोऽलभेताम् (अनु.14.89-90)–

**आराध्य स महादेवं प्राप्तवानतुलं यशः।**

विविधा ऋषयो देवाश्च शिवस्य प्रसादात्किं किं फलमलभन्तेति विस्तरेण वर्णितं तत्र श्रीवासुदेवेन। तस्मिन्ननुशासनपर्वणि तु दर्शितं यत् श्रीकृष्णः उमामहेश्वराभ्यां वररूपेण साम्बं पुत्रं लब्धवान् (15.4)। अपि चासौ ताभ्यामष्टौ वरान् याचितवान्। महाभारतकारः कथयति–

**द्विजेष्वकोपं पितृतः प्रसादं**
**शतं सुतानां परमं च भोगम्।**



**कुले प्रीतिं मातृतश्च प्रसादं**
**शमप्राप्तिं प्रवृणे चापि दाक्ष्यम्॥** (अनु.15.6)

उमा सर्वं तत्प्रतिश्रुतवती। एवं शिवशक्त्यामपि वरदानस्यानुपमं सामर्थ्यं दर्शितमस्ति। तस्मिन्नेव पर्वणि षोडशेऽध्याये ऋषितण्डिकृतं विशालं शिवस्तोत्रं वर्तते यत्र शिवस्य सांख्ययोगशास्त्रप्रवर्तकत्वं विशेषेण निरूपितम्। तथा च–

**यं पठन्ति सदा सांख्याश्चिन्तयन्ति च योगिनः।**
**परं प्रधानं पुरुषमधिष्ठातारमीश्वरम्॥** (अनु.16.4)

दार्शनिकदृशा स्तोत्रमेतत् (अनु.16.12.66) न केवलं विस्तीर्णं प्रत्युत सांख्यादिशास्त्रसमन्वयरूपमपि वर्तते यत्र पञ्च कैवल्यादिगतयोऽपि चर्चिताः। सर्वाः शिवप्रसादादेव लब्धुं शक्याः (16.65)। अनुपदमेव सप्तदशाध्याये शिवसहस्रनामस्तोत्रम्।[1] उपमन्युकृतं वर्णितम्, तस्य पाठश्रवणफलं च निगदितम्। स्तोत्रस्य प्राप्तिपरम्परापि तत्र दर्शिता। ब्रह्मणः हृदि स्थितं स्तोत्रं क्रमशः शक्र-मृत्युदेव-रुद्रगण-तण्डि-शुक्र-वैवस्वत-नारायण-यम-नाचिकेत-मार्कण्डेय-उपमन्युपर्यन्तं समागतम्। अस्य निष्कृष्टं फलं तु–

**योगदं मोक्षदं चैव स्वर्गदं तोषदं तथा।** (अनु.17.172)

महाभारते बहवो जना भगवतः शिवस्याराधनया तपसा च स्वं स्वं वाञ्छितं फलं प्राप्नुवन्निति वर्णितमस्ति। द्रौपदी पूर्वजन्मनि पतिप्राप्तये उग्रेण तपसा शंकरं भगवन्तं तोषितवतीति कथाऽऽदिपर्वणि लभ्यते। तथा हि–

**ततस्तप्तुमथारेभे पत्यर्थमसुखा ततः।**
**तोषयामास तपसा सा किलोग्रेण शङ्करम्॥** (आदिपर्व 168.8)[2]

किञ्च द्रुपदसभायां लक्ष्यवेधसमयेऽर्जुनः ईशानं शिवं कृष्णं च मनसा प्रणम्य धनुरग्रहीत्–

**प्रणम्य शिरसा देवमीशानं वरदं प्रभुम्।**
**कृष्णं च मनसा कृत्वा जगृहे चार्जुनो धनुः॥** (आदि.187.18)

तस्मिन्नेव पर्वणि श्वेतकिनाम्नो नृपस्य कथा वर्तते (अध्याय-222)। राजानं तं यजमानं सन्तं दीर्घकालव्यापिनि यज्ञे ऋत्विजः क्लान्ताः। राज्ञाभ्यर्थिताः अपि कार्यं परित्यज्य निर्गताः। तथात्वे राजा श्वेतकिः शिवमेव यज्ञं कारयितुं प्रार्थयामास। तेन प्रेरितः तपश्चचार। अन्ततः शिवः दुर्वाससं स्वकीयमंशं कथयित्वा तेनैवर्षिणा श्वेतकेर्यज्ञं सञ्चालयामास। राजासौ शिवं प्रीणयितुं कैलासपर्वते एव तपस्तेपे– **कैलासं पर्वतं गत्वा तप उग्रं समास्थितः।** (आदि 222.36 उत्तरार्धः)।

मगधराजो जरासन्धः शिवस्य परमो भक्तो बभूव। शिवमाराध्य तेन नाना पार्थिवाः बन्दीकृताः (सभापर्व 14.64-6)। जरासन्धः तेषां राज्ञां बलिं दत्त्वा शङ्करमाराधयितुमकामयत। तदर्थं श्रीकृष्णेन धर्मातिक्रमणमिति भर्त्सितः–

**मनुष्याणां समालम्भो न च दृष्टः कदाचन।**
**स कथं मानुषैर्देवं यष्टुमिच्छसि शङ्करम्॥** (सभा 22.11)

पाण्डवो भीमस्तं दुराचारिणं जरासन्धं मल्लयुद्धे हतवानिति प्रसिद्धा कथा। एवं शिवाराधने धार्मिका अधार्मिकाश्च सर्वेऽप्यधिकृता इति प्रतीयते। राक्षसराजो रावणोऽपि शिवभक्त इति।

धृतराष्ट्रस्य पत्नी गान्धारी कुमारावस्थायां शिवाराधनां कृत्वा तस्माद् भगवतः शतपुत्रप्राप्तिवरं लब्धवती।[3] कुरुपितामहो भीष्मस्तदेव समीक्ष्य धृतराष्ट्रेण तस्या विवाहार्थं गान्धारराजं प्रति दूतं प्रेषयामास, विवाहसम्पादने च सफलो बभूव। पतिप्राप्तये सन्तानलाभाय च शिवाराधना वर्णिता महाभारतेऽद्यापि प्रचलति। राजा सगरोऽपि पुत्रकामनया सपत्नीकः कैलासपर्वतं गत्वा शिवोपासनां चकार।[4]

भगवान् शिवः न सर्वेभ्योऽभीष्टं वरं ददातीति वनपर्वणि जयद्रथप्रसङ्गात् स्पष्टं भवति। जयद्रथः द्रौपदीमपहृत्य पलायितः, भीमेन धर्षितः सन् युधिष्ठिरेण कृपया मोचितः। तदा सः अपमानप्रतिकाराय उमापतिं शिवं शरणं जगाम, तपश्च चचार। जयद्रथः सर्वान् पाण्डवान् युद्धे पराजेतुं वरं याचितवान्–

**समस्तान् सरथान् पञ्च जयेयं युधि पाण्डवान्।**[5]

तदा भगवान् शिवो 'ने'ति उवाच। यद्यपि सर्वे अजय्याः अवध्याः किन्तु अर्जुनादृते सर्वान् वारयिष्यसि। अर्जुनस्तु नारायणसहायतया अजितः। किञ्च तस्मै मया पाशुपतास्त्रं दत्तम्, लोकपालेभ्योऽपि वज्रादीन् महाशराँश्चासौ प्राप्तवान्। एवं शिवेन वरदानम् औपबन्धिकमेव दत्तम्।[6] वनपर्वण्यर्जुनेनापि मृत्तिकानिर्मितायां यज्ञवेदिकायां शिवस्य निर्माल्येनार्चनं कृतमासीत्–

**शरण्यं शरणं गत्वा भगवन्तं पिनाकिनम्।**
**मृन्मयं स्थण्डिलं कृत्वा माल्येनापूजयद् भवम्॥**[7]

प्रसङ्गोऽयं किरातार्जुनीयस्य महाकाव्यस्य विषयः। अर्जुनः पाशुपतास्त्रलाभाय भगवन्तं प्रीणयितुमुग्रं तपश्चचार। किरातवेशधारिणा शिवेन सहास्य भीषणः संग्रामोऽभवत्। रुधिराक्तवपुरेव अर्जुनः शिवार्चनायां संलग्नस्तदा तदर्पितं माल्यं किरातस्य शिरसि विलोक्य विस्मितः सन् पादयोः पपात। शिवोऽवदत्–



**प्रीत्या च तेऽहं दास्यामि यदस्त्रमनिवारितम्।**
**त्वं हि शक्तो मदीयं तदस्त्रं धारयितुं क्षणात्॥**[8]

स्मरणीयं यदनेनैव शिवाल्लब्धेन[9] पाशुपतास्त्रेणार्जुनः जयद्रथस्य शिरोऽच्छिनत्। तच्छिरश्च वृद्धक्षत्रस्य सिन्धुराजस्य (जयद्रथपितुः) एवोत्सङ्गेऽपतत्, येन तस्यापि अङ्कान्निपातितम्। तस्य वृद्धस्य मूर्धा शतधा जातः।[10]

## महादेवस्वरूपम्

भगवतो महादेवस्य स्वरूपविषयेऽपि यत्र-तत्र सामग्री महाभारते लभ्यते। विशेषतो व्यासेनैव शिवस्वरूपाणि वर्णितानि। व्यास एवार्जुनं सूचयति यत्स्वप्ने तं शिवं त्वं द्रक्ष्यसि। स नीलकण्ठः, कपालमालाधारी, त्रिपुरान्तकः, वृषभेऽवस्थितः, शूली, पिनाकी, गजचर्मधारी च।[11] द्रोणपर्वणि व्यासो वर्णयति यद् विश्वरूपोऽसौ शिवः। काले एकधा बहुधा च जायते। किन्तु घोरा शिवा चेति द्विविधाऽस्य तनुः क्रमशो विनाशाय कल्याणाय च। घोरा तनुरेव अग्निः विष्णुर्भास्करः शिवा तनुः सौम्या सती आपो ज्योतींषि चन्द्रमाश्च। द्रोणपर्वणि शतरुद्रियं स्तोत्रं (अध्यायः-202) व्यासेन अर्जुनाय वर्णितम्। तस्योपरि स्पष्टतो यजुर्वेदस्य प्रभावो दृश्यते। शितिकण्ठः, कपर्दी, उष्णीषी, हिरण्यबाहुः, पर्जन्यपतिः, गोपतिः, भूतपतिः, वृक्षपतिः, बहुरूपः, त्रिशूलपाणिः, पिनाकी, खड्गचर्मधरः, महोदरः, महाकायः इत्यादिरूपः शिवः। स कदाचिद् बालरूपोऽपि जायते–

**स पार्वत्याः कृते शर्वः कृतवान् बालरूपताम्।**[13]

तस्य विश्वरूपतां निर्दिशन्नेव कालिदासः कुमारसम्भवे महाकाव्ये निरूपयति–

**न विश्वमूर्तेरवधार्यते वपुः।** (कुमारसम्भवम् 5.78)

अर्जुनः शिवस्योत्कृष्टो भक्त इति महाभारते बहुवारं वर्णितम्। वनपर्वणि किरातवेशधारिणा भगवता शंकरेण सह संग्रामे सति अर्जुनस्य शौर्येण प्रीतो भगवान् दिव्यास्त्रमस्मै प्रादात्। तदार्जुनः बहुभिर्नामभिः शिवमस्तौत् यथा–

**कपर्दिन् सर्वदेवेश भगनेत्रनिपातन।**
**देवदेव महादेव नीलग्रीव जटाधर॥** (वनपर्व 39.74)
**ललाटाक्षाय शर्वाय मीढुषे शूलपाणये।** (वनपर्व 39.79)

शिवस्यानुचरा अपि शिवानुरूपा एव यथा–

**तस्य पारिषदा दिव्या रूपैर्नानाविधैर्विभोः।**
**वामना जटिला मुण्डा ह्रस्वग्रीवा महोदराः॥**

**महाकाया महोत्साहा महाकर्णास्तथापरे।**
**आननैर्विकृतैः पादैः पार्थ वेषैश्च वैकृतैः॥**
**ईदृशैः स महादेवः पूज्यमानो महेश्वरः॥** (द्रोणपर्व 202.19-21)

सपरिषदं भगवन्तं शिवं पूजयन्तो जना लोकं परलोकं च साधयन्ति **( इहलोके सुखं प्राप्य ते यान्ति परमां गतिम्–** द्रोण. 202.28)।

शिवस्याराधने लिङ्गपूजनस्य विशिष्टं महत्त्वम्। 'लीनं गमयतीति लिङ्गम्' अर्थात् अदृश्यमपि भगवन्तं बोधयति। द्रोणपर्वणि कथितं श्रीकृष्णेन यत् शिवलिङ्गं सर्वमूल्यं भगवत्स्वरूपम्। तस्यार्चनेन शिवः परं प्रमुदितो जायते–

**सर्वभूतभवं ज्ञात्वा लिङ्गमर्चति यो जनः।**
**तस्मिन्नभ्यधिकां प्रीतिं करोति वृषभध्वजः॥** (द्रोणपर्व 201.96)

अनुशासनपर्वण्यपि शिवविग्रहस्य लिङ्गस्य वार्चने महती सम्पत्तिः फलतीति प्रतिश्रुतम्–

**विग्रहं पूजयेद् यो वै लिङ्गं वापि महात्मनः।**
**लिङ्गं पूजयिता नित्यं महतीं श्रियमश्नुते॥** (अनु.पर्व 161.16)

शिवस्य लिङ्गमूर्तिपूजनेन आस्तिका अभीष्टं फलं लभन्ते। कालान्तरे विकसिते शिवपुराणे स्वयम्भूलिङ्गानां द्वादशानां भारते वर्षे विभिन्नक्षेत्रेषु स्थितिर्निरूपिता। तान्येवाधुना ज्योतिर्लिङ्गानीति कथितानि। वस्तुतः शिवस्य रूपद्वयं निर्दिष्टमस्ति–निष्क्रियं जगत्कारणं चेति। निष्क्रियं रूपं तु निर्गुणमलिङ्गं च। किन्तु जगत्कारणस्वरूपमेव शिवलिङ्गत्वेन सर्वत्र पूज्यमानम्। अतस्तच्छिवस्य प्रतीकरूपं ज्ञेयम्।[14]

महाभारते शिवपार्वत्योर्धर्मविषयकः संवादोऽपि व्यापकतया वर्णितः यत्र विविधानां धर्माणां विवरणं महादेवेन कृतम्।[15] अत्र महादेवो धर्मस्याधिष्ठातेति सिध्यति। तन्त्रशास्त्रेऽपि बहुधा तयोः संवादः तन्त्ररहस्यानि प्रकटीकरोति। कतिपयानां रहस्यानामुद्भेदको भगवान् शिव एव। कतिपयानि भगवत्या पार्वत्या उद्भेद्यन्ते। अनुशासनपर्वणि स्त्रीधर्मप्रकरणं तु पार्वत्या एव प्रतिपाद्यन्ते इति तयोः समानं गूढविद्याज्ञातृत्वम्।

उपरि शिवस्य द्विविधा मूर्तिः प्रकल्पिता–घोरा अघोरा च। घोरा रुद्रमूर्तिः, अघोर तु शिवमूर्तिः। रुद्रमूर्तिः संहारस्वरूपा शत्रुनाशार्था। अपरत्र शिवमूर्तिः शान्ता कल्याणकारी शान्तचित्तस्य योगेश्वरस्य भगवतः। शान्तिपर्वणि (166.63) तयोः रूपयोरेकत्वं स्पष्टं प्रतिपादितम्–



**स रुद्रो दानवान् हत्वा कृत्वा धर्मोत्तरं जगत्।**
**रौद्रं रूपमथोत्क्षिप्य चक्रे रूपं शिवं शिवः॥**

अनेन ज्ञायते यदेक एव देवः प्रयोजनानुसारेण रौद्रं शिवं वा स्वरूपं धारयति। यत्तु लिङ्गपूजनं प्रचलति तत्सौम्यरूपस्य शिवस्यैवार्चनम्। विग्रहपूजने रुद्रो वा शिवो वा वर्तते इति पूजकस्य श्रद्धानुसारेण तदर्चनम्। अतः शिवार्चने श्रद्धा भावना वा भक्तस्य महत्त्वमाप्नोति।

यद्यपि महाभारतस्य नायकः श्रीकृष्णस्तथापि तस्य श्रद्धा भगवति महादेवे पुनः पुनः दर्शिता। नररूपेणार्जुनेन नारायणरूपेण श्रीकृष्णेन च शिवो भूयो भूयः समर्चितः। स वस्तुतो देवेषु देवो महादेवः महाभारतेऽपि यथायथं वर्णितः।

***

**सन्दर्भाः**

1. नामानि तु अनु. 17.13-153 इत्यत्रैव वर्णितानि। आदावन्ते च फलश्रुतिः।
2. उत्तरार्धः यथावत् आदिपर्वणि (196.45 पद्येऽपि) पुनरावृत्तः। तत्रापि पत्यर्थमेव तपः ऋषिकन्यया।
3. आदिपर्व 109.9-10
4. वनपर्व 106.10-13
5. वनपर्व 272.27 (उत्तरार्धः)।
6. वनपर्व 272.29-30
7. वनपर्व 39.65
8. वनपर्व 39.71
9. द्रोणपर्व 81.22 **( ततः पाशुपतं दिव्यमवाप्य पुनरीश्वरात् )।**
10. द्रोणपर्व 146.130
11. सभापर्व 46.13-5
12. द्रोणपर्व 202.106-8
13. द्रोणपर्व 202.93 (पूर्वार्धः)
14. राणाप्रसादशर्मा - पौराणिक कोश, पृ.452
15. अनुशासनपर्व 140-146

***

# फ्रांस्देशे संस्कृतस्य गृहप्रवेशः अथवा शेजि (Antoine Léonard Chézy) महोपाध्यायचरितम्

**प्रो. प्येर् सिल्वें फिल्योजः**

अंत्वन्-लेओनार् शेजीति नामकः फ्रांसीयो विद्वान् संस्कृतस्य प्रथमोपाध्यायत्वेन कीर्तिं प्राप्तवान्। तस्य स्मरणीयमितिवृत्तं प्रसिद्धे फ्रांसीयराजकीयविद्यामहासंस्थाने समपद्यत। तस्य संस्थानस्य को विशेषः? एतत् षोडशशतकारम्भे 1531तमे वत्सरे विशिष्टाभिप्रायेण स्थापितमासीत्। तत्समये प्यारिस्-विश्वविद्यालयः सोर्बोन्नामको विद्याविज्ञानविमर्शानामेकाधिकारम् अभजत। तत्र केवलं देवविद्याध्यात्मिकविज्ञाने व्याकरणन्याययोश्च विचारः अभवत्। गणितादिविज्ञानानि उपेक्षितानि। केवलं लतिनभाषा प्रयुक्तासीत्। परन्तु विज्ञाने नव्यमार्गा उद्घाटिता आसन्। विदुषां पूर्वदेशीयभाषाणां प्राच्यसाहित्यानां च जिज्ञासा व्यरजत। अत एव सुप्रबुद्धः फ्रांसीयराजा प्रथमः फ्रांस्व (Francois I) विदुषां निर्देशनमाकर्ण्य नवीनमार्गं प्रति विज्ञानस्य प्रवर्तनार्थं 1531तमे संवत्सरे प्यारिस्पुरे फ्रांसीयराजकीयविद्यामहा-संस्थानं प्रतिष्ठापितवान्। तत्राध्ययनविषयनियमो नासीत्। सर्वेषु गणितज्योतिषादिशास्त्रेषु विमर्शो यथामति यथायुक्तं विद्वद्भिः कर्तुं शक्यते। पूर्वपश्चिमदक्षिणोत्तरदेशीयसाहित्यानामध्ययनमनुज्ञानं सम्मानं च लभते। तथ्यमालोचितव्यमित्येको नियमो भवति।

एष कालः यूरोपीयदेशानां वैज्ञानिकेतिहासे स्मरणीयः। तस्मिन् षोडशशतके फ्रांस्देशे इतलीयराज्येषु च संस्कृतिपरिक्रान्तिः समापद्यत। विज्ञानविषये साहित्यविषये शिल्पकलासु चित्रकलासु नवीनपरिणामः प्रावर्तत। सकलभूमेरन्वेषणं समारब्धम्। पूर्वपश्चिमदिक्षु दूरस्थितदेशेषु संस्कृतिमाहात्म्यस्य प्रकाशनमासीत्। अपि च कश्चिद्विशेषः स्मर्तव्यः। वैयक्तिकविदुषो जिज्ञासा शोभना। परन्तु तस्मिन्विदुषि दिवंगते तेन प्राप्तं ज्ञानं कुत्र गच्छति? अवश्यं राजकीयेन राष्ट्रियेन वा संस्थानेन अविच्छिन्न आश्रयो दातव्यः। विज्ञानपरंपरादृढप्रतिष्ठार्थं तादृशसंस्थानान्यपेक्ष्यन्ते। एतत्प्रयोजनं



मनसि कृत्वा प्रबुद्धो राजा फ्रांसीयराजकीयविद्यामहासंस्थाने सर्वेषु नव्यशास्त्रेषु विविधानि वैज्ञानिकस्रोतांसि प्रववृते।

प्रथमतो हेब्रु-अरबिक्-पारसिक-तुरुष्कभाषाणामध्ययनाध्यापनार्थम् एक एव विद्वान् फ्रांसीयराजकीयविद्यामहासंस्थाने नियुक्तः। सप्तदशशतके पौरस्त्यदेशेषु बहवो यात्रिकाः पारसीकभाषामाश्रित्य भारतदेशे साहसेन पर्यटनानि चक्रिरे। अष्टादशशतके मतिमान् व्युत्पत्तिमान् ख्रीष्टमतप्रचारकः पोंस्नामा संस्कृतभाषाधिगत्य संस्कृतस्य व्याकरणं साहित्यनिरूपणं च विरचय्य संस्कृतग्रन्थशतद्वयं संगृह्य फ्रांस्देशस्य राजकीयग्रन्थालये न्यासितवान्। 1802तमे वत्सरे आंक्तिल् दुपेरों महाविद्वान् पञ्चाशदुपनिषदां लतिन्भाषायामनुवादं व्याख्यानं चाकरोत्। एवम् एकोनविंशशतकस्य प्रारम्भे संस्कृतभाषाधिगमोपयोगार्हा व्याकरणकोशग्रन्थमातृकादिसामग्री संनद्धा। कश्चित् कुलीनोऽपि निर्धनो युवकः शेजिनामकस्तदुपकारग्रहणस्य सौभाग्यमभजत्।

एतस्य पिता (1718-1798) अंत्वन् शेजिनामा प्रसिद्धोऽभियन्ता। एष सरित्प्रणालिकादिषु जलप्रवाहव्यवस्थानियमान्निर्दिश्य प्यारिस्नगरे सेतुमार्गादीन् निर्माप्य संरक्ष्य च प्रसिद्धिमभजत। तथापि स्वजीवनान्ते फ्रेंच्महाक्रान्तिसंक्षोभवशादुग्रां दरिद्रतामन्वभूत्।

तस्य पुत्रः अंत्वन्-लेओनार्नामक आसीत्। एष प्यारिसपुर्या निकटे 1773तमे वत्सरे जनवरीमासस्य पञ्चदशदिने लब्धजन्मा। प्रथमतो वैज्ञानिकशिक्षां प्रारभ्य तत्संत्यज्य प्राच्यभाषाध्ययनमारभत। हेब्रु-अरबिक्-पारसिक-तुरुष्कप्राच्यभाषाणां शिक्षां प्रववृते। तत्समये प्यारिस्नस्नगरे प्राच्यप्रादेशिकभाषाशिक्षाकेन्द्रमभवत्। तत्र लुवि-मथ्य लन्ग्लेस् (Louis-mathieu Langlès) उपाध्यायस्तुरुष्कारबीयभाषयोरध्यापने नियुक्तः। यशस्वी सिल्वेस्त्र द ससी (Silvestre de Sacy) महाविद्वान् फ्रांसीयराजकीयविद्यामहासंस्थाने अरबीय-पारसिकभाषयोरुत्कृष्टशिक्षां प्रदाय तत्साहित्यविषये विमर्शमकरोत्। तीव्रोत्साहप्रयुक्तः शेजिर्युवकस्तयोः शिष्यः। तस्य भाषाणां प्रतिपत्तौ विशिष्टकौशल्यमासीत्। अपि च साहित्यस्य काव्यस्य च रसिकः।

1798तमे संवत्सरे नपोलेओं बोनपर्त् (Napoléon Bonaparte) एजिप्त्-देशे विजययात्रां सज्जीकृत्य अरबीयभाषाभिवादाधिकारे वेंतुर द परदी (Venture de Paradis) इतिनामकमरबीयोपाध्यापकं नियुक्तवान्। स मुख्याभिवादी सहकारित्वेन शेजिमहाशयमामन्त्रितवान्। परन्तु दुर्दैववशात् प्रस्थानसमये शेजियुवकेन व्याधिपीडितेन यात्रा संत्यक्तव्या। ततः प्यारिस्-नगरे सिल्वस्त्र द ससी-

महाविदुषानुगृहीतः स फ्रांसीयराष्ट्रियपुस्तकालयस्य प्राच्यभागे नियुक्तोऽभवत्। तत्र प्राच्यभाषाध्ययनव्रती प्राच्यलिखितपुस्तकरक्षायामधिकृतम् अरबीय-पारिसक-तुरुष्क-संस्कृत-चीनीयादिभाषाकोशसंग्रहमालोड्य परमप्रमोदेन प्राच्यसाहित्यानां परिचयं प्राप्नोति स्म। विशेषेण पारसीकसाहित्यस्याध्ययनमकरोत्।

तस्मिन्काले प्यारिस्नगरी युरोपवर्षस्य प्राज्ञिकी राजधानी। 1802तमे वत्सरे श्लेगल् (Schlegel) महाविद्वान् जेर्मनिदेशादागतः प्राच्यभाषासु कुतूहलचोदितः प्राच्यसंग्रहाणां दर्शनार्थं फ्रांसीयराष्ट्रियपुस्तकालयस्य प्राच्यभागं प्रविश्य शेजिमहाशयेन प्रतिनन्दितः। एतेन सह जेर्मनीया युवतिः हेल्मिन वोन् क्लेन्क (Helmina von Klenke) प्रविशति स्म। प्रथमदर्शने परस्परानुराग आविरासीत्। स सुरूपो युवकः पाण्डित्येन वाक्पत्येन च शोभते स्म। सा सुन्दरी व्युत्पत्तिमती साहित्यमार्गं प्रवेष्टुमैच्छत्। तयोर्द्वौ पुत्रौ लब्धजन्मानौ। परन्तु कतिपयवर्षेभ्यः पश्चात् जेर्मनीयफ्रांसीयव्युत्पत्त्योः संघट्टवशात् तयोः सौभाग्यवत्संगमः समाप्तिमगच्छत्। 1810तमे वर्षे पुत्रसहिता हेल्मिना स्वदेशं प्रत्यागच्छत्। न कदापि पुनर्दर्शनं तयोरासीत्। जेर्मनिदेशे हेल्मिना वोन् चेजीति नाम धारयित्वा साहित्यग्रन्थान् रचयित्वा विशेषेण प्यारिस्नगर्यां स्वनिवासानुस्मृतिविषये स्मारकग्रन्थं जेर्मन्भाषायां प्रकाशितवान्। एकस्मिन्दिवसे प्यारिस्नगरे वीथ्यां पर्यटनसमये शेजिनो दृष्टिः किंचित्कौतुकं प्रेक्षमाणेन जनसंघेनाकर्षिता। पारसिकदेशदूतः स्वदेशोचितदेहपरिच्छदधारी सबृहदुष्णिषाद्याभरणः पारसिकदौत्यमन्दिरस्योद्याने पर्याटत्। समीपं गत्वा द्वाराग्रे किंचित्कालं शेजिरतिष्ठत्। दूत एनमुपलक्ष्य स्वभाषायां द्वित्रशब्दानवोचत्। एक एव शेजिरधिगतवान्। किंच पारसिभाषामाश्रित्य प्रौढ्या उत्तरमदात्। तच्छ्रुत्वानन्दितो भूत्वा दूतस्तत्क्षणे युवकविद्वांसमामन्त्रितवान्। शेजिः सोपचारैः सत्कृतो दूतेन सह पारसिकसंभाषणं बभाज।

1803तमे वत्सरे अलेक्सन्दर् हमिल्तन् (Alexander Hamilton) इतिनामकोऽङ्ग्लीयविद्वान् वङ्गदशे चिरनिवासी संस्कृतज्ञः हितोपदेशकोशपरीक्षार्थं प्यारिस्नगरमागतवान्। तत्र राष्ट्रियपुस्तकालये संरक्षितसंस्कृतमातृकाणां सूचीग्रन्थं रचितवान्। स संस्कृतभाषाया अध्यापनमकरोत्। श्लेगल् (Schlegel), जं-लुवि बर्नुफ् (Jean-Louis Burnouf), फोर्येल् (Fauriel), वोल्ने (Volney), लंग्लेस् (Langlès) इत्यादयः प्राच्यसंस्कृतिकुतूहलिनो विद्वांसस्तस्य शिष्या आसन्। शेजिस्तु लंग्लेस्-उपाध्यायस्य शिष्यः सन् स्वगुरुणा शिष्यत्वसंभजनमनुचितमिति कृत्वा



हमिल्तोन्विदुषः संस्कृतपाठान् श्रोतुं नागच्छत्। तदैव पारसिकसाहित्यान्तर्गतशृङ्गारादि-रसानास्वादयन् तत्सभ्यतासौकुमार्यादिगुणान् विस्मयेन संमानयन् तद्विषये कार्यान्तरे व्यापृतचेता आसीत्।

1806तमे वत्सरे नपोलेओन् फ्रांसीयराजकीयविद्यामहासंस्थाने पारसीक-भाषोपाध्यायपदं प्रस्थापितवान्। सिल्वेस्त्र दससीतिनामकं प्रसिद्धं विद्वांसं तत्र नियोजितवान्। तस्मिन्नेव वत्सरे नपोलेओन् प्रतिदशवर्षं साहित्यग्रन्थानुवादस्पर्धाजेयं पारितोषिकं धनरूपेण ग्रन्थमुद्रणमूल्यरूपेण च प्रतिशुश्राव। स्पर्धायां शेजिः पारसिकसाहित्ये ग्रन्थश्रेष्ठस्य जामिविरचितस्य मेज्नून्लैलाचरितनाम्नः प्रथमं फ्रांसीयानुवादं प्रदर्शितवान्। एष स्पर्धाविजयी भूत्वा हर्षातिशयेन मुद्रणालये स्वलिखितग्रन्थं मुद्रणार्थं शीघ्रं न्यस्य प्रतिश्रुतधनमाकाङ्क्षत। न कदापि धनमागतम्। स्वमाहात्म्यलुब्धो महासम्राट् दिग्विजयमालोच्य स्वप्रतिज्ञाविस्मरणशाली। परन्तु शेजिनिर्धनविदुषा केवलं मुद्रितपुस्तकं मुद्रणदेयकं च लब्धम्। एष हताशः। सिल्वेस्त्र द ससीमहाशयः लक्ष्म्यनुगृहीतः स्वशिष्यप्रियः स्वधनेन तं रक्षितवान्। लोकयात्रा शुभाशुभघटनापरम्परा। तस्मिन्नेव 1806तमे संवत्सरे काचित् शुभतमा घटना शेजिललाटफलके विधिना लिखिता। शाकुन्तलनाटकस्य फ्रांसीयानुवादपुस्तकं तस्य हस्तयोरागतम्। विल्यम् जोन्स् (William Jones) महाविदुषा कालिदासस्य कीर्तितनाटकरत्नस्य आङ्ग्लभाषानुवादः 1789तमे वर्षे प्रकाशितः। तस्यैवानुवादस्य पुनरनुवादो फ्रांसीयभाषायां संस्कृतज्ञानरहितेन कौशल्यहीनेन ब्रुग्येर् (Bruguière) नामकेन लेखकेन 1790 प्रकाशितः। तथापि तत्पठित्वा पठित्वा भावरसानु-भवेनाकर्षितो महोत्साहचोदितः शेजिः संस्कृतभाषां प्रतिपत्तुं निर्णीतवान्। तस्मिन् काले युरोपीयदेशेषु संस्कृतव्याकरणकोशादयो भाषाधिगमोपाया दुर्लभा आसन्। केवलं विल्किन्स् (Wilkins) इतिनाम्नाङ्ग्लीयविदुषाङ्ग्लभाषायां विरचितं संस्कृतव्याकरणं 1808तमे वत्सरे लोन्दन्नगरे प्रकाशितं तथा च राष्ट्रियपुस्तकालये पोंस्नामकखीष्टीयप्रचारकेण प्रेषिता लिखितकोशाः उपलभ्यन्ते स्म।[1] अपि च मूलग्रन्थानामङ्ग्लानुवादानां च तुलनात्मकसमीक्षां कृत्वा शनैः शनैः कुशाग्रबुद्धिः शेजिः संस्कृतशब्दार्थानधिगतवान्।

1810तमे वत्सरे च विल्किन्स् - रचितसंस्कृतव्याकरणग्रन्थस्य सविस्तरैः परीक्षां पञ्चपृष्ठशोधपत्ररूपेण मोनितर् (Moniteur) इतिनाम्नि लोकश्रुते वार्त्तापत्रे प्राकाशयत्। तेन तस्य संस्कृतविद्याप्रागल्भ्यं विस्तरेण विश्रुतमभवत्। आत्मशिष्यस्थिर-

संरक्षकः सिल्वेस्त्र द ससी संस्कृतविमर्शे तमुदतेजयत्। अपि च प्राच्यसंस्कृति-माहात्म्यमनुमन्य स फ्रांसीयविद्यामहासंस्थाने संस्कृतभाषासाहित्याद्यध्यापनप्रवेशमैच्छत्। 1814तमे वर्षे नपोलेओन्सम्राट् अङ्ग्लीयसैनिकैः पराजितः परिगृहीतः फ्रांस्देशाद्विवासितश्च। फ्रांसीयराजवंशदायादः अष्टादशलूवि (Louis XVIII) नामा राजा प्रभुत्वं प्राप्नोत्। सिल्वेस्त्र द ससी राजपरिसरे प्रभावशाली सन् राजानमुपगम्य सर्वप्राच्यभाषासाहित्यशास्त्रादिविषये विमर्शावश्यकतां सर्वप्रमाणैः प्रदर्श्य नव्यविज्ञानप्रगत्येकव्रते फ्रांसीयविद्यामहासंस्थाने संस्कृतचीनीयभाषोपाध्यायपदप्रतिष्ठापनं विशेषेणार्थयित्वा राजानुमतिमार्जयत्। एवं 1814तम संवत्सरे नवम्बेर्-मासस्य एकोनत्रिंशे दिने लूवि-राज्ञि शासति फ्रांस्-देशे राजकीयाज्ञया प्यारिस्-पुर्यां फ्रांस्-विद्यामहासंस्थाने विदुषः शेजिमहाशयस्य कृते गीर्वाणभाषोपाध्यायपदं प्रतिष्ठापितमासीत्। तस्यामेव राजाज्ञायां रेमुज (Rémusat) नाम्नो विदुषः चीनीभाषोपाध्यायपदमपि प्रतिष्ठापितमासीत्। अग्रिमे वत्सरे 1815तमे नपोलेओन् महासम्राजा प्रत्यागम्य पुनः शासनं कृत्वा तत्प्रतिष्ठापनं समर्थितमासीत्। प्रभूतप्रभावशाल्यपि यशोलुब्धो नपोलेओन् संस्कृतमाहात्म्यं प्रकल्प्य स्वस्य कृते देवभाषोपाध्यायपदस्य प्रतिष्ठापककीर्तिमैच्छत्। किं च तत्समये चीनदेशे मञ्चुभाषैव मञ्चुसम्राजा प्रयुक्ता। तस्मान्नपोलेओन् चीनदेशेन सह संधिमभिप्रेत्य चीनमञ्चुभाषयोरध्यापनपदप्रतिष्ठापनं निरणयत्। फ्रांस्देशेतिहासे उग्रतमापत्कालभूते तस्मिन्वर्षे संस्कृते तादृशादरः शासकानामवर्ततेत्याश्चर्यमेतत्। 1815तमे वत्सरे जनवरीमासस्य षोडशदिवसे शेजिः संस्कृतसाहित्यमाहाम्यविषये प्रथमं व्याख्यानं वाचयति स्म। इदंप्रथमतया यूरोपद्वीपे प्रसिद्धसंस्थाने राजशासनेन संस्कृताध्ययनाध्यापने चिरकालस्थास्नूपाध्यायपदे आधीयेते स्म। तत्प्रथमोपन्यासे शेजिः संस्कृताध्ययनप्रयासान् स्वयमेव निरूपायामास- 'तादृशाध्ययने नैजकुतूहलाकर्षितः क्षमासमन्वितो वा संस्कृतविद्यामन्दिरे गर्भ-गृहतिरोधानयवनिकामुद्धर्तुं दधृष। यावत् यवनिकायाः प्रत्येकस्यां वल्यामपवर्तितायाम् एको ज्योतिरंशुर्मद्दृष्टिपथं प्राप्नोत् तावत् मत्कुहूलसमर्थनं समजयत। यथा मुमुक्षुः कृच्छ्रक्रियानुष्ठानेन चिरेण विश्रम्य परब्रह्म लीयते, तथा श्रान्तिसंततिमनुभूय जगत्संस्कृततमपुरातनदेशानां मध्ये एकस्य देशस्य पुण्यं विद्यामन्दिरं प्रमोदेन प्रविवेश। कीदृशानन्दो मया नानुभूयते स्म, यदाहं चिरादनधिगम्यानि पुरातनतालपत्राणि पठितुं दार्शनिकगम्भीरविचारान् प्रबोद्धुं च समर्थमात्मानमैक्षिषि।' 1817तमे वत्सरे विल्सन् (Wilson) कृताङ्ग्लपद्यानुवादं पठित्वा फ्रांसीयराजपुस्तकालये रक्षितलिखित-कोशद्वयं समीक्ष्य च कालिदासविरचितमेघदूतसंग्रहं प्रकाशितवान्। तत्र शेजिः



प्राधान्येन शृङ्गाररससंतुष्ट उत्तरमेघं गौरवाधानेनानुगृहीतवान्। इदंप्रथमतया मन्दाक्रान्त-वृत्तलक्षणं प्रदर्श्य छन्दःपरीक्षामकरोत्। न पदरूपाणि स्वयं विवृत्य संग्रहमात्रकर्तृत्वात् स ग्रन्थसंशोधकत्वात् विल्सन्विद्वांसं निन्दति। तथाहि पद्यानुवादात् पदरूपाणामध्ययनं कर्तुं न शक्यते। तदर्थं व्याकरणटिप्पनीभिः ग्रन्थविवरणमावश्यकम्। एतदेव शेजिना कृतम्।

1826तमे वत्सरे रामायणान्तर्गतयज्ञदत्तवधोपाख्यानं प्रकाशितवान्। वङ्गलिप्यां लिखितां मातृकामाश्रित्य रामायणे अयोध्याकाण्डे ऋषिकुमारवधोपख्याने 65-66सर्गौ पठित्वा शिलाक्षरैः शोभनरीत्या तत्सर्गद्वयस्य मुद्रणं कारयति स्म। फ्रांसीयभाषायां क्वचिदक्षरशः क्वचिन्मूलग्रन्थाद्दूरं गत्वा सर्गद्वयमन्ववदत्। अपि च बालबोधार्थं पदैकैकस्य रूपमर्थं तेषामन्वयं च सविस्तारं प्रादर्शयत्। शेजिस्तु पाणिन्यादि-भारतीयव्याकरणमननुसृत्य प्रत्युत 'विल्किन्स्' आख्याङ्ग्लीयविदुषा पश्चिम-संप्रदायिकव्याकरणरीत्या विरचितं व्याकरणमाश्रित्य स्वव्याकरणव्याख्यानं प्राबध्नात्। तस्मिन्व्याख्याने बालः शब्दान् शब्दार्थान् व्याकरणविधींश्च प्रतिपद्यते स्म। किं च रामायणमहोदधौ शिष्याणां प्रथममज्जनमित्येवं ते संस्कृतसाहित्यराजमार्गे प्रविशन्ति। भाषामात्रस्य शिक्षणं न पर्याप्तम्। भाषाशिक्षणसमय एव भारतीयविद्याभिवृद्ध्यर्थं सामान्यप्रबोधार्थं च साहित्यं शास्त्रं वोपदेष्टव्यम्। शिक्षारम्भे रामायणस्य सरलत्वादुदात्तत्वाच्च सुमन्त्रित उपदेश इष्यते। आदिकाव्यपठनात् संकृतभाषासौन्दर्याव-गतिर्बुद्ध्युन्नतिश्चेति शेजिविदुषा प्रबुद्धम्। स न केवलं भाषाविद्वान्, परंतु कविरप्यासीत्।

तस्य कविगुणाः फ्रांसीयानुवादेषु स्पष्टमुपदर्शिताः। तस्यापूर्वानुवादरीतिरासीत्। स मूलवाक्यं सम्यक्परीक्ष्य वाक्यार्थं विचार्य स्वप्रतिभया फ्रांसीयवाक्यं रचितवान्। भाषावैज्ञानिका लक्षणैकचक्षुष्कास्तादृशरीतिं निन्दन्ति। इयं स्वच्छन्दचारिणी सुन्दरीत्याचक्षन्ते। अन्ये तु साहित्यरसिकाः संस्कृताज्ञानान्मूलमदृश्य संस्कृतविदो वा मूलं दृष्ट्वापि फ्रांसीयानुवादगुणदोषानालोच्य तत्र वास्तविकान् साहित्यिकधर्मान् साधु मन्यन्ते। 1830तमे संवत्सरे शेजिविद्वान् सानुवादं सव्याख्यानं शाकुन्तलनाटकं प्रकाशितवान्। राजकीयपुस्तकालये रक्षितेषु लिखितकोशेष्वेकतमं कोशरत्नमभिज्ञान-शाकुन्तलविषयम्। एष वङ्गलिपिलिखितो तालपत्रमयः प्रायेण त्रुटिरहितः कोशः। तत्र गौडीपरंपरागतग्रन्थरूपमुपलभ्यते। प्रतिपुटं स्थूलाक्षराणां पङ्क्तित्रये संस्कृतप्राकृत-मूलं लिख्यते। अधस्तादुपरिष्टाद्वा प्राकृतस्य छाया। शेजिहस्तयोः केवलमेष कोशो विल्यम्-जोन्स्-विदुषोऽङ्ग्लीयानुवादश्च वृत्येते स्म। कोशं सावधानेन पठित्वा जोन्स्-

अनुवादे प्रायशः पञ्चाशदपार्थवाक्यानि दृष्ट्वा समीचीनार्थानवधृत्य पश्चिमदेशेषु प्रथमं शाकुन्तलमूलग्रन्थस्य संस्करणं कथंचिदकार्षीत्। फ्रांसीयानुवादः संस्कृतमूलात् साक्षात्परिकल्पितमित्यसंशयम्। क्वचित्क्वचित् संस्कृतमूलात् किंचिद्भिद्यते। कस्माद्धेतोर्भेदोऽस्ति? अनुवादरीतेः दूरगतिपरत्वात्? अर्थबोधाभावाद्वा? न जानीमः यथा-

**अयं स ते तिष्ठति संगमोत्सुको विशङ्कसे भीरु यतोऽवधीरणाम्।**
**लभेत वा प्रार्थयिता न वा श्रियं श्रिया दुरापः कथमीप्सितो भवेत्॥**

राजा विटपान्तरितः शकुन्तलाया अवधीरणाशङ्कां श्रुत्वात्मगतं तत्सरलं श्लोकं वदति। अत्रार्थान्तरन्यासालंकारः। प्रथमार्धश्लोके राज्ञोऽन्तिकसंनिधिहेतोरवधीरणा-शङ्काया अभाव इति विशेषस्योक्तिः, द्वितीयार्धश्लोके श्रियः अवधीरणाशङ्का नास्तीति सामान्यस्योक्तिः। नरः श्रियं लभेत वा न वा, श्रिया पुनरीप्सितः कथं दुर्लभो भवेदित्यर्थः। अत्र सामान्येन विशेषः समर्थ्यते। समर्थनेनैव पूर्णकामताया असंदिग्धता राज्ञो हर्षातिशयश्च ध्वन्येते। शेजिविदुषोऽनुवादे तु चरमपादे भिन्नार्थो भवति- ''अरसिकस्य कामद्रोहिणश्च नरस्य कथं श्रियः कटाक्षो भविष्यति'' इत्यनेन सामान्यस्य न विशेषसमर्थकत्वमस्ति, अलंकारस्य च हानिर्भवति। परन्तु कामद्रोहिणोऽपूर्णकामता ध्रुवेत्युक्त्या कामिनः पूर्णकामता निश्चिता। तथैव तदसंदिग्धता राजहर्षवृद्धिश्च ध्वन्येते। अत्राक्षरार्थहानिरलंकारहानिश्च न तु ध्वनिहानिः। किं च श्रृङ्गाररसाभिव्यक्तिः स्पष्टा।

यथा वा-

**दुष्यन्तेनाहितं तेजो दधानां भूतये भुवः।**
**अवेहि तनयां ब्रह्मन्नग्निगर्भां शमीमिव॥**

आपन्नसत्त्वा शकुन्तलेति वृत्तान्तोऽशरीरवाण्या कण्वं प्रति कथितः। अत्र तेजःशब्दो रेतसि वर्तते। शेजिस्तु ''दुष्यन्तकीर्तिकिरणं तनयोत्सङ्गमाविशति स्म'' इत्यनुवदति। तस्य समये फ्रांसीयसमाजे व्युत्पन्नजनाः शुक्राद्युपादानं ग्राम्यं मन्यन्ते स्म। तादृगनौचित्यवारणार्थं शेजिविदुषो ग्राम्यधातुस्थाने लालित्यवद्वस्तूपादानं शरणमासीत्। वस्तुतस्तेज इति नानार्थः शब्दः। बलदीप्तिप्रभावादौ वर्तते। अनेन गर्भवासेऽपि भाविचक्रवर्तिगुणसंपन्नत्वं ध्वन्यते। शेजिनोऽनुवादे यशोरश्मीत्यर्थान्तरमपि कल्पितम्। अनेन यशस्विनस्तेजस्वित्वात् तद्गुणसंपन्नत्वमुपलक्ष्यते। नास्ति ध्वनिहानिः।

एवं शेजिविरचितानुवादे प्रायेण भावरसध्वनिर्विराजते। नूनं शेजिः संस्कृतप्राकृत-भाषाविद्वान् भवतीति निर्विवादः। परन्तु स कविरप्यासीत्। तस्य फ्रांसीय-



साहित्यिकप्रबन्धरचनारीतिर्लालित्यलावण्यादिगुणलक्षिता। अनुवादप्रकाशनसमये व्युत्पन्नमण्डलेषु कौतूहलमासीत्। लमर्तिन् (Lamartine) नामा प्रसिद्धः फ्रांसीयमहाकविः स्वदैनंदिनप्रबन्धे लिलेख- ''अहं केवलं कविः। शेजिस्तु विद्वान् कविश्च। स्वयमेव सहृदयः सन् स्वहृदयेऽनुभूतार्थं वाचयति प्रसारयति च। यदा तस्य हृदयभावेन संयुक्ता विद्वत्ता मया ज्ञाता, तदैव ममोत्साहस्य हेतुरवगतः।''

एवं शेजिविदुषः प्रधानकार्यं सफलम्। परंतु दुर्दैववशात् स्वचारितार्थ्यं न चिरात्संतुतोष। विषूचिकारोगप्रसरसमये 1832तमे वत्सरे पञ्चत्वं गतवान्। यत् सुखदुःखसंततिमये स्वजीवने तेन साध्यते तत्सर्वं प्रथमसंस्कृतोपाध्यायपदप्रतिष्ठा संस्कृतप्राकृतशब्दानां प्रकृतिप्रत्ययान्वाख्यानं भावरसप्रधानानुवादरीतिरित्यादि नवीनमार्गं प्रविवेश।

***

## सन्दर्भाः


1. तत्र द्रष्टव्यं ''संस्कृतविषयेऽन्ताराष्ट्रियविमर्शमूलग्रन्थाः'' 'आरण्यक'मितिनाम्नि शोधपत्रे, संस्कृतप्रसारपरिषद्, आरा, मार्च, 2012।


***

# बङ्गीयकथासङ्ग्रहानुवादः मेघमल्लारः - एका समीक्षात्मिका दृष्टिः

**अरिजित् गुप्तः**

अलब्धगाधे विश्ववाङ्मये कस्यापि साहित्यस्य समृद्धौ विकासविधौ च विद्यतेऽनुवादस्य महती भूमिका। यद्यप्यत्र अपरस्य काव्यकृतिः भाषान्तरणसनाथेन रूपान्तरीक्रियते, तथापि अनुवादकस्य स्वतन्त्रता नाङ्गीकर्तुं पार्यते। अनुवादो द्विविधो भवति– शब्दानुवादः भावानुवादश्च। प्रथमविधौ मूलभावं क्वचिद्विहाय क्वचिदहात्वैव शब्दपरिवर्तनेन रूपान्तरीकरणं दृश्यते, अपरत्र मूलकवेर्भावाः अविकृततयैव भाषान्तरे रूपान्तरीयन्ते, अत्र मूलकाव्यस्य शब्दसम्पत्तिः हानिमाप्नोति। अनुवादो नाम भाषातो भाषान्तरणम्, अनुसर्जनं नाम भाषातो शब्दभावापरित्यागेन रूपान्तरणम्। पद्धतिरियं नितरामसरला इति जानन्ति अनुवादकाः।[1]

विश्वसाहित्येषु बङ्ग-हिन्दी-आङ्गल-ओडिया-असमीयेत्यादिसाहित्ये नवयुगसनाथेन मौलिकरचनाविकासः यथा पल्लवितो न तथा संस्कृतवाङ्मये। स्वातन्त्र्योत्तरकालेऽपि नवीनरचनारक्तकमलैः रत्नाकरायते विश्ववाङ्मयम्। अनुवादसाहित्येनापि वाङ्मयस्य ऋद्धिर्विकासश्च सम्भवतीति मन्यन्ते साहित्यिकाः समालोचकाश्च। अनूदितसाहित्यैः किञ्चिदपि वाङ्मयं न तथा संवर्धितुं शक्यते, यथा मौलिकसाहित्यकृतिभिः इति प्रवीणाः विद्वांसः मन्यन्ते। किन्तु अनुवादसनाथेनापि कस्यापि वाङ्मयस्य समृद्धिः सम्भवति। आङ्गलशासिते भारतवर्षे 'बाईबिल' (Bible) इत्यस्य संस्कृतानुवादोऽपि विहित आसीत् पुण्यपत्तननगर्याः कैश्चिद् विद्वद्भिः। अथ च स्वातन्त्र्योत्तरकाले अतः आधुनिके भारतवर्षे मौलिकनवीनकृतिभिः सार्धं विविधाभिः अनूदितसाहित्यधाराभिः भृशमुपचीयमानमस्ति संस्कृतवाङ्मयम्। इतरसाहित्यानामिव वङ्गीयवाङ्मयस्य कथा-प्रबन्धोपन्यासादीनां संस्कृतानुवादैः अर्वाचीनसंस्कृतकाव्यकदम्बं नितरां पल्लवायतेतमाम्। बङ्गसाहित्यस्य विविधा धाराः संस्कृते लब्धस्थाना दृश्यन्ते।



बङ्किमचन्द्रचट्टोपाध्याय-रवीन्द्रनाथठाकुर-शरच्चन्द्रचट्टोपाध्याय इत्येतेषां सुकृतयः संस्कृते अनूद्यन्ते। अस्मिन्नेव प्रसङ्गे आगच्छति कथासाहित्यिकः विभूतिभूषण-बन्द्योपाध्यायः। तस्य 'मेघमल्लार' इत्यभिधेयः कथासङ्ग्रहः श्रीराकेशदाशेन सम्प्रति अनूदितः।

'मेघमल्लारः' नाम कथासङ्ग्रहः 1931 ईसवीयशब्दे प्रकाशितः 1921-1930 ईसवीयाब्दं यावद् कथाः रचिताः प्रकाशिताश्च। सङ्ग्रहस्य प्रथमा कथा 'मेघमल्लार' इति। तदभिधानेनैव सङ्ग्रहस्याभिधानं दत्तम्। अत्र बौद्धयुगेन साकं तान्त्रिकयुगसन्धिक्षणं च संदर्शितम्। कथायाः नायकः प्रद्युम्नः बौद्धविहारस्य आवासिकः अध्येता, मेघमल्लाररागे पारदर्शी गुणाढ्यनामतान्त्रिकस्य छलेन मुरल्यां मेघमल्लारं वादयित्वा देवीं सरस्वतीं बन्दिनीं कर्तुं तेन साह्यं कृतम्। अन्ततो गत्वा गुणाढ्यस्य साहाय्येनैव विशिष्टमन्त्रप्रयोगेण देव्याः बन्धनमोचनं विधाय आजीवनप्रस्तरत्वं स्वीकरोति प्रद्युम्नः। यद्यपि अस्याः मूलकथा स्वातन्त्र्यपूर्वकाले विरचिता, तथापि स्वातन्त्र्योत्तरकाले विहितेऽस्मिन् कथानुवादे आधुनिकप्रभावः सुस्पष्टमवलोक्यते। मूलरचनातः अनुवादे मूलरचनायाः भावसम्पत्तिः प्रायः पूर्णतया संरक्ष्यते।

## वर्णपटुता

भद्रावतीतटिनीतटे प्रद्युम्नस्य वंशीवादनं, तस्य सुमधुरध्वनिमाकर्णयन्ती प्रद्युम्नप्रेमिका सुनन्दा। अत्र प्रान्तरस्य नदीघट्टस्य वर्णनं कथाकारस्य प्रकृतिप्रेम नितरां प्रस्फुटयदस्ति। अनूदितायामपि कथायां तस्य छटा कियदापत्यते। तद्यथा–

**भद्रावतीनद्याः तटे शाल्मलीतमालादिवने तस्मिन् वर्षे घनघोरा वर्षा अभूत्। समग्रं गगनमास्तीर्य कस्याश्चिद् विरहिण्याः पुरसुन्दर्याः मेघश्यामलः अत्यन्तविन्यस्तचिकुरराशिः, प्रावृड्जन्यः घनान्धकारः तस्याः प्रियहीन-हृदयस्य निविडनिर्जनता, दूरवनस्य अनियमितः वातः तस्याः आकूल-दीर्घश्वासः, तस्याः प्रतीक्षाश्रान्ते अक्षिणी; अश्रुभारेण अविरामवृष्टिः, मेघमेदुरस्य आकाशस्य वक्षसि क्षणप्रभा तस्य हताशहृदये क्षणिकाशायाः मेघदूतः।**[2] इति।

कियदाश्चर्यं वर्णनवैदग्धम्। अत्र वर्णनायां प्राञ्जलता, सरसमधुरता चास्याः नवीनत्वं द्योतयति। प्रद्युम्नस्य वंशीध्वनौ मेघमल्लारमाकर्ण्य तस्य पुरतः आविर्भवती सरस्वती, तस्याः रमणीयवर्णने कवयितुः मौलिकत्वं अनुवादयितुश्च भाषान्तरसामर्थ्यं

चात्र युगपत् प्रकाशते। यथा हि–

**प्रद्युम्नः सविस्मयम् अपश्यत्– मध्येक्षेत्रं शतपौर्णमास्याः ज्योत्स्नायाम् इव अपरूपालोकमण्डले काचन ज्योत्स्नावरणी अनिन्द्यसुन्दरी महिममयी तरुणी। तस्याः निविडकेशराशिः अत्यन्तविन्यस्तः तस्याः अपूर्वां ग्रीवाम् उभयतः प्रसृतः, तस्याः आयतनेत्रयोः दीर्घकृष्णपक्ष्माणि कस्यचिद् दिव्यशिल्पिनः कुर्चेन चित्रितानि, तस्याः तुषारधवला बाहुवल्ली दिव्यपुष्पाभरणमण्डिता, तस्याः कोकनदे इव पादतले वक्षसि धर्तुं धरित्र्यां वासन्तीकुसुमानां दलानि विकसितानि... आम्, इयमेव देवी वीणा। ... अस्याः वीणायाः मङ्गलझङ्कारेण देशेषु शिल्पिनां सौन्दर्यतृष्णा सृष्टिमुखी भवति।**[3]

धन्यं कवेः कल्पनम्, भाषायाः प्रयोगप्रौढिश्च। कलाधिष्ठात्र्याः सरस्वत्याः हिन्दुभिः कल्पिता मूर्तिः, या हि बौद्धाचार्येण वसुव्रतेन कपोलकल्पितेति गण्यते, प्रत्यक्षं तां दृष्ट्वा भूयो विस्मापयति प्रद्युम्नः।

पुनः कथाशेषे यदा देव्याः सरस्वत्याः बन्धनमुक्तये मन्त्रपूतवारि सिषेचे, ततः सममनन्तरमेव प्रस्तरीभवनात् प्राक् प्रद्युम्नः अनुभवति अनिर्वचनीयम् आस्वादम्–

**''प्रद्युम्नः दृढहस्तेन पुनः अञ्जलिमितं जलं देव्याः सर्वाङ्गेषु पुनः प्रौक्षत। निमेषाय तस्या नेत्रयोः पुरतः वायौ कश्चन अपूर्वसौन्दर्यस्य स्निग्धप्रसन्नहिल्लोलः अवात्। सर्वं देहः मनः आनन्देन वेपथुं प्राप्तम्। तदा एव तस्य मनसि आगतं, वाराणस्यां तेषां गेहे सन्ध्याकाशनिबद्धाक्षिणी वातायनमार्गनिबद्धाक्षिणी तस्य माता।''**[4]

कथाकारस्य कल्पनवैविध्यमत्र रचनावर्त्मन्येव दरीदृश्यते।

**भाषायाः सारस्यम्–**

यतो हि अनूदितसाहित्ये मूलभाषातः भाषान्तरणसनाथेन साहित्यसज्जनं विधीयते, अतोऽत्र मूलभाषायाः साकम् अनूदितभाषायाः समञ्जसता सरसता चावश्यमपेक्ष्यते। यथा, मूलकवेः शैली रचनारीतिरपि अनुवादकर्त्रा सम्यक् अनुसरणीया वर्तते। अस्यां कथायां जैष्ठसंक्रान्ते दशपारमितायाः मन्दिरे पूजनार्थम् आगते जनसम्मर्दे सुरदासवेशिना तान्त्रिकगुणाढ्येन मिलित्वा स्वीयसहचरीं सुनन्दां द्रष्टुं गिरिगात्रतः अवतरन्नासीत् प्रद्युम्नः–



**''सन्ध्या तदा अपि न आगता, मन्दिरं यस्य लघोः पर्वतस्य उपरि आसीत्, तम् एव उभयतः गिरिनितम्बमार्गेण महिलाः उत्सवात् गृहं प्रत्यागच्छन्। प्रद्युम्नस्य नेत्रे कस्यचिद् जनस्य अनुपदिनी सम्मर्दे इतस्ततः अधावतां, क्षणात् परम् एव स ताः पृष्ठतः परित्यज्य द्रुतपदनिक्षेपेण अवातरत्'' इति।**[5]

तान्त्रिकः गुणाढ्यस्तमकथयत्, प्रकृतः सङ्गीतसाधकश्चेत् पूर्णिमातिथौ प्रकृतस्वरयोजनेन मेघमल्लारं वादयति गायति वा, देवी सरस्वती स्वयं तस्य सकाशमाविर्भवति। एतादृशप्रलोभनेन देवीसन्दर्शनार्थम् एकाग्रमनसा पूर्णिमारात्रौ मेघमल्लारं वादयति प्रद्युम्नः। यथा वर्णितं मेघमल्लारे–

**''तदा पर्यावरणं नीरवमासीत्। अन्धकारात् पुरतः क्षेत्रे किमपि द्रष्टुं न शक्यते स्म। शाल्मलीवने शाखासु वाताघातेन कश्चन अद्भुतः रवः भवति स्म। बृहतः क्षेत्रस्य पारे शाल्मलीवनस्य समीपे क्षितिजस्य निकटे नैशी प्रकृतिः पृथिव्याः वक्षसः तमसाच्छन्नायाः शष्पशय्यायां स्वाञ्चलं विस्तीर्णवती'' इति।**[6]

अत्र क्रियापदप्रयोगे तथा च वाक्यसंरचनाशैल्यां च भाषायाः सारल्यं सौमाधुर्यञ्च दरीदृश्यते, संस्कृतवाङ्मयोऽपि नवीनरचनाम्बुजैः तडागायमानो दृश्यते।

**भाषान्तरितः शब्दप्रयोगः–**

विभूतिभूषणस्य रचनासु बङ्गीयसंस्कृतिः भृशमवतिष्ठते। विविधवृक्षविहगादीनां नामानि, वङ्गदेशस्य उत्सवाचाराः, लौकिकप्रथाश्च पुनः पुनः कथासु आगच्छन्ति।

अतः तेषां संस्कृतानुवादे नूनं विद्यते अनुवादकस्य महती भूमिका। अस्मिन् कथासंग्रहे **पूतिकामञ्च** (बङ्गीये पुँइमाचा) इत्यभिधेयकथायां बङ्गदेशस्य ग्राम्यसंस्कृतिः चित्रीयते। दरिद्रब्राह्मणस्य सहायहरेः मुखरा स्त्रीः अन्नपूर्णा, तयोः दुहितात्रयम्– क्षान्तिः, पुटिः राधा चेत्येतान् आधरीकृत्य क्षुद्रबालिकायाः भोजनप्रियता, मातुः क्रुद्धतिरस्कारभयात् तस्य संवरणम्, विवाहादनन्तरं तस्याः अकालमरणमित्यादिविषयाः वर्णिताः। अत्र कश्चित् पूतिकामञ्चं लक्षीकृत्य कथा विन्यस्ता। अस्यां कथायां आञ्चलिकाः बङ्गीयशब्दाः संस्कृते कृतानुवादा दृश्यन्ते। यथा–

**''स्वेदकस्य साम्प्रतिकीम् अवस्थाम् अन्नपूर्णा अपि नाजानात्, क्षान्तैः वैयक्तिकमञ्जुषायाम् एव तत् तिष्ठति।''**[7]

अत्र 'वैयक्तिकमञ्जुषा' पदेन वस्त्राधारः विवक्षितः। पौषसंक्रान्तौ नानाविधान् पिष्टकान् निर्माय संभक्ष्य च आचारं समापयन्ति बङ्गीयाः। पिष्टकनिर्माणप्रक्रिया कथाकारेण कियच्चित्रिता–

**''मकरसंक्रान्तिः। सायम् अन्नपूर्णा एकस्मिन् बृहति कंसे तण्डुलचूर्णान् गोधूमचूर्णान् च गुडेन मिश्रयति स्म, एकस्मिन् लघु कंसे कंसपुरं तैलम्। क्षान्तिः एकस्मिन् कदलीपत्रे नारिकेलं खण्डयति।'' पुनः क्षान्तेः वचने पिष्टकप्रकारा अपि उल्लिख्यताः कथाकरेण। प्रतिवेशिनो गेहे निर्मितपिष्टकविषये क्षान्तिः गदितवती– ''प्रातः तु पायसं, सूपयुक्तं पुलिपिष्टकं, मुद्गपूपः इत्यादिकं पक्वम्। ... सान्द्रक्षीरनिर्मितं पिष्टकं घृतेन भृष्टं चेद् एव पिष्टकं भवति वा? ... पितृव्या तु तस्मै 'पाटिसापटा' पिष्टकम् अदात्। अहो! कीदृशः दग्धगन्धः! मातुः पिष्टके कदापि तादृशो गन्धो भवति वा? 'पाटिसापटा' पिष्टके सान्द्रक्षीरप्रदानेन भस्म इव स्वादो भवति।''**[8]

अत्र बङ्गीयसंस्कृतिः संक्रान्त्युत्सवाचारः पार्वणभोजनशैली च सम्यङ् चित्रिता, येन बङ्गदेशस्य संस्कृत्यादयः अबङ्गीयानामपि सकाशे प्रत्यक्षचित्रमिव प्रतिभासन्ते।

**मानवीयभाववर्णनम्–**

ग्राम्यबङ्गस्य दरिद्रपरिवारस्य क्षुद्रातिक्षुद्रविषयदर्शने मानवीयमनोभावाः सनैपुण्यं चित्रीयन्ते। सांसारिकार्थाभावमध्ये त्रयोदशवर्षीयाया ज्येष्ठ्यायाः कन्यायाः चापल्यं रसनप्रियत्वम् अटनप्रियत्वं तथा च तस्याः गतिप्रकृतौ पितुः औदासीन्यं चाभिलक्ष्य गृहिणी माता अन्नपूर्णा स्वक्रोधं प्रकाशयति। अत्र दरिद्रग्राम्यपरिवारस्य नितरां साधारणं दृश्यं चित्रितं कथाकारेण, यदा अन्नपूर्णा तिरस्करोति दुहितरम् क्षान्तिम्–

**''दृष्टे, अद्य तव पृष्ठे अहं काष्ठखण्डं भञ्जयिष्यामि। वरोजपोतायाः वनं गता कन्दं चोरयितुम्? विवाहयोग्या कन्या। विवाहस्य वयः भूत्वा कियान् कालो व्यतीतः न जाने। तत्र घनं विजनं वनं, तन्मध्ये मध्याह्ने व्याघ्रः गुप्तः स्थातुं प्रभवेत् ... तव कः श्वशुरः आगमिष्यति त्वां त्रातुम्? यदि भाग्यात् लभ्यते तर्हि भोक्ष्ये, न लभ्यते न भोक्ष्ये, अन्यस्य वस्तुनि हस्तक्षेपं कुतः करिष्यामि? अनया कन्यया किमह करवाणि अम्ब।''**[9]

अत्र कन्यायाः कृते दुश्चिन्ता अन्नपूर्णायाः दुर्वचसां कारणम्। तथाप्यत्र कन्याचिन्ताग्रस्तं मातृहृदयमपि कियत् प्रकाश्यते।



अनुवादेऽपि मूलरचना प्राणैर्न हीयते। इदमेव अनुवादकस्य साफल्यम्- मूलकवेर्भावानां शैल्याश्च अक्षुण्णतया भाषान्तरीकरणात्। श्वशुरालयं प्रतिप्रेषणसमये क्षान्तिमातुः अन्नपूर्णायाः जननीसत्ता पूर्णतया जागरिता दृश्यते। तस्याः कन्या असतर्का, अत्यन्तनिरीहा, अधिकभोजनपट्वी। अपरिचिते परिवारे परिवेशे च कथं सा स्थास्यतीति विचिन्त्य उद्वेलचेतसा भणति अन्नपूर्णा– **क्षान्तिम् अन्ये सम्यग् बोधिष्यन्ते खलु?**[10]

**मूल्यायनम्–**

इत्थमवलोकितम्, अनूदितेऽपि संस्कृते विभूतिभूषणस्य स्वकीयः भावः स्वीया शैली च श्रीराकेशदाशेन सम्यक् संरक्षितः। बङ्गीयमूलः मेघमल्लारश्चेत् पठ्येत, तर्हि इदं साक्षात् प्रमाणीभूतं स्यात् यदनुवादे मूलकवेर्भावसम्पत्तिः हानिं न प्राप्नोत्यत्र। काव्यचमत्कृत्याऽपि सङ्ग्रहोऽयं रमणीयः श्लाघ्यश्च-सरस्वत्याः दिव्यरूपवर्णनं, भद्रावत्याः सौन्दर्यवर्णनम् इत्यादि नायिकासौन्दर्यवर्णनेन उपमातुं शक्यते। तथा च, पिष्टकनिर्माणप्रसङ्गे अन्नपूर्णायाः कन्याभर्त्सने बङ्गीया जीवनशैली ग्राम्यसंस्कृतिश्च स्फटिकमणिरिव स्पष्टीकृता कथाकृता। अनुवादेऽपि मूलरचना प्राणैर्न हीयत इत्यत्र प्रमाणीकृतम्। अतः अनूदितोऽयं कथासङ्ग्रहः आधुनिकसंस्कृतवाङ्मये स्वीयस्थान-मध्यकार्षीदिति दिक्।।

**सन्दर्भाः**

1. मेघमल्लारः, भूमिका, पृ.1
2. मेघमल्लारः, पृ.7
3. मेघमल्लारः, पृ.8
4. मेघमल्लारः, पृ.16
5. मेघमल्लारः, पृ.2
6. मेघमल्लारः, पृ.7
7. मेघमल्लारः, पृ.94
8. मेघमल्लारः, पृ.95
9. मेघमल्लारः, पृ.93
10. मेघमल्लारः, पृ.96

***

# शृङ्गारप्रकाशस्य प्रातिपादिके नवाचाराः

**सर्वेशकुमारशान्डिल्यः**

प्रतिथतयशा विदग्धमण्डलीमण्डिता संस्कृतकाव्यशास्त्रीया भागीरथी स्वोद्गमकालादनारतमेव वर्तमानं यावत् सम्प्रवर्ततेतराम्। तस्यां गङ्गाधारायां विनिवेदितानि नैकेषां पण्डितपुरन्दराणां कोविदमिलिन्दानां विविधपदार्थोपस्थापनपराणि विपुलानि काव्यशास्त्रग्रन्थसुमनसः परस्परं स्पर्धिभावेनास्माकं समेषां समक्षं विलसन्ति। संस्कृतकाव्यशास्त्रीया गङ्गाधारा अग्निपुराणकारादारभ्य स्वातन्त्र्योत्तरकालेऽपि नितरां प्रवर्तमाना संदृश्यते। काव्यशास्त्रं नाम संस्कृतस्य गरिष्ठं वरिष्ठञ्च ज्ञानम्। संस्कृतकाव्यशास्त्रीयाः केचिद् विद्वांसः इष्टार्थप्रतिपादकं शब्दं काव्यत्वेनाङ्गीकुर्वन्ति। अन्ये च शब्दार्थौ सहितौ काव्यमिति मन्यन्ते। यथा दण्डिजगन्नाथादयः आचार्याः शब्दः काव्यमित्यस्य सिद्धान्तस्य परिपोषकास्सन्ति, एवं भामह–रुद्रट–आनन्दवर्धन–मम्मट–कुन्तकादय आचार्याः द्वितीयं मतं शब्दार्थौ सहितौ काव्यमित्यामनन्ति। काव्यलक्षणमतिरिच्य एतैः आचार्यैः काव्यस्य अनिवार्यतत्त्वविषयकम् काव्यात्मविषयकञ्च चिन्तनमपि समासादितम्। यमधिकृत्य परवर्त्तिभिः समालोचकैः निर्णीताः संस्कृतकाव्यशास्त्रे रसालङ्कारादयः षट्संख्याकाः काव्यसमीक्षासिद्धान्ताः सहृदयानां दृष्टिपथं प्राप्ताः। एतेषां सिद्धान्तानां प्रतिपादकैः आचार्यैः काव्यात्मसम्बन्धविषये विविधाः विचाराः प्रोद्घाटिताः। प्रायशः सर्वैरेव स्वीकृतं यत् शब्दार्थावेव काव्यस्य शरीररूपेण विराजेतेतरामिति। अत एव भामहादिभिः आचार्यैः शब्दार्थौ सहितौ काव्यमिति काव्यलक्षणं प्रकटितम्। यद्यपि आचार्याः शब्दार्थयोः अलङ्कारास्तु प्रदर्शितवन्तः परं किंविधश्शब्दः? किंविधोऽर्थः? किंविधश्चानयोः साहित्यभावः? साहित्ये अभिप्रेतः इत्यस्मिन् विषये सविस्तरं नोदीर्य मौनं धारयन्ति। एकादशशताब्द्यां परमारवंशजातेन भोजराजेन 'शृङ्गारप्रकाश' इति बृहदाकारः काव्यशास्त्रीयो ग्रन्थो विरचितः। भोजदेवः भारतीयसंस्कृतसाहित्याकाशे विदुषामाश्रयकः उदारः दानशीलश्च



राजरूपेण सभाजित आसीत्। एषः विद्वत्सेवा-दानशीलता-सततशास्त्रचर्चापरपर्यायत्वेन समग्रेऽपि वाङ्मये ख्यातिम् अलभत। भोजराजः विद्वद्रक्षकः एव नासीदपितु स्वयमेव महान् विद्यापरायणः कुशलस्साहित्यिकः व्याकरणशास्त्रेऽप्यप्रतिहतगतिं धारयामास। भोजदेवस्य अनेके ग्रन्थाः संप्राप्यन्ते। तेषु सरस्वतीकण्ठाभरणं शृङ्गारप्रकाशश्च काव्यशास्त्रीयौ ग्रन्थौ स्तः। शृङ्गारप्रकाशः षट्त्रिंशत्प्रकाशेषु विभक्तोऽस्ति। तत्र प्रथम-द्वितीय-तृतीयप्रकाशेषु काव्यसन्दर्भे शब्दतत्त्वं प्रोद्घाटयति। एवमेव चतुर्थे–पञ्चमे–षष्ठे च प्रकाशे अर्थतत्त्वस्य महद्विचारं प्रकटयति। सप्तमप्रकाशात् एकादशं यावत् शब्दार्थयोः साहित्यभावं प्रकाशयाञ्चकार भोजदेवः। शृङ्गारप्रकाशे प्रथमप्रकाशस्य प्रारम्भ एव ये काव्यशास्त्रविदः शब्दार्थौ सहितौ काव्यमित्यामनन्ति तत्र कश्शब्दः? कोऽर्थः? किञ्च साहित्यमिति अस्याः जिज्ञासायाः निराकरणाय द्वादशविधश्शब्दः, द्वादशविधोऽर्थः, द्वादशविधश्च शब्दार्थयोः सम्बन्धः निरूपितः। द्वादशविधश्शब्दः यथा हि– 1. प्रकृतिः, 2. प्रत्ययः, 3. उपस्कारः, 4. उपपदम्, 5. प्रातिपदिकम्, 6. विभक्तिः, 7. उपसर्जनम्, 8. समासः, 9. पदम्, 10. वाक्यम्, 11. प्रकरणम्, 12. प्रबन्धः। साहित्यक्षेत्रे यश्चागमः आचार्यानन्दवर्धनेन अभिनवगुप्तेन च ज्ञातेप्यनिक्षिप्तः, प्रस्तुतोऽयं ग्रन्थः तस्यागमस्यास्ति प्रतिप्रस्तुतिः। भाषैव काव्यमिति धिया ग्रन्थेऽस्मिन् भाषायाः आरम्भिकघटकेभ्य आरभ्य प्रबन्धान्तिमरूपं यावद् व्यापकविश्लेषः परिदृश्यते। अत एवायं साहित्यक्षेत्रे पाणिनिव्याकरणशास्त्रस्यापि प्रतिनिधित्वमुपयाति। सम्पूर्णायाः संस्कृतकाव्यशास्त्रपरम्परायाः सूक्ष्मावलोकेन संदृश्यते यत् शब्दार्थयोरस्ति कीदृशी विचारपद्धतिः। अत एव आचार्यभोजराजस्यायासः सर्वथैव नाविन्यमुपयाति। यद्यपि व्याकरणे समेषामेषां निरूपणं क्रियते, परं भोजराजकृतं निरूपणं विशिष्टमेव। यतो ह्यनेन कविशिक्षां मनसि निधाय निरूपणं कृतम्। भोजराजेन शास्त्रस्य व्यवहारे प्रवर्तनाय, काव्ये लब्धविविधप्रचुरराशिशब्दानां संविज्ञानाय, क्षिप्रं कवित्वसाधनायोत्कर्षाय च कुत्रचिद् पाणिनिव्याकरणादतिरेकं विधाय कुत्रचिच्चानुकृत्यात्र कश्चन एषः प्रकृतिप्रत्यययोर्विभागप्रकल्पः समुद्घाटितः। अथ च एतेषु बहूनां शब्दानां व्यारकणशास्त्रे विवेचनं लभ्यते, तथापि तेषां व्याकरणशास्त्रस्य पारिभाषिकशब्दानां साहित्यदृशा कवित्वं समेधयितुं नवं नवतरं नवविधञ्च विवरणं विवेचनं कृतमत्र शृङ्गारप्रकाशे। तेष्वपि शब्देषु प्रातिपादिकस्य अत्यन्तं सुसूक्ष्मं प्राञ्जलञ्च निदर्शनमत्र प्रादर्शि भोजराजेन। अत एव तेषु द्वादशसु शब्देषु पञ्चमस्य भेदस्य प्रातिपादिकस्य भेदोपभेदैस्सह प्रकृतशोधपत्रेऽस्मिन् विवेचनं नवत्वञ्च विनिवेदयिष्यते। भोजदेवेन शृङ्गारप्रकाशस्य द्वितीयप्रकाशे शब्दस्य

पञ्चमभेदस्य पाणिनिव्याकरणमनुसृत्यैव प्रतिपादनं कृतम्। पदं पदं प्रतिपदं प्रतिपदस्य भावः प्रातिपदिकं भवति। पाणिनीयाष्टाध्याय्यां षट् सूत्राणि वर्तन्ते येषु प्रातिपदिक इत्यानुपूर्व्याः अवबोधो भवति। तानि च सूत्राणि अर्थवदधातुरप्रत्ययः प्रातिपदिकम्,[1] ह्रस्वो नपुंसके प्रातिपदिकस्य,[2] प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा,[3] सुपो धातुप्रातिपदिकयोः,[4] नलोपः प्रातिपदिकान्तस्य,[5] प्रातिपदिकान्तनुम्विभक्तिषु च[6] इत्येतानि सन्ति। समेषामेषां सूत्राणामाकलनेन प्रातिपदिकनाम्नी काचन संज्ञा एव। अतः अर्थवत् शब्दस्वरूपं प्रातिपदिकसंज्ञकं भवति, धातुं प्रत्ययं प्रत्ययान्तं च वर्जयित्वा।[7] यथा– पुरुष, हस्तिन्, डित्थ, कपित्थ। द्वितीयं कृत्प्रत्ययान्ताः, तद्धितप्रत्ययान्ताः, समासाश्च प्रातिपदिकसंज्ञकाः भवन्ति।[8] यथा– कारक, हारक। शालीय, औपगव। राजपुरुष, कष्टश्रित। महाभाष्येऽपि आचार्यः पतञ्जलिः बभाषे– ''निपातस्य चानर्थकस्य प्रातिपदिकसंज्ञा वक्तव्या।''[9] शृङ्गारप्रकाशे प्रातिपदिकरूपेण पाणिनिव्याकरणशास्त्रीयाः पारिभाषिकशब्दाः, उत वा इतस्ततो विप्रकीर्णाः सम्बद्धाश्च प्रातिपदिकांशाः अत्रैकान्वये संगृहीताः। विवेचनमिदं प्रातिपदिकसंसारं तं प्रकटयति नवरूपेण। भोजदेवः इमां प्रातिपदिकसमष्टिं सर्वप्रथमम् अवयवावयविरूपेणाङ्गीकृत्य त्रिधा विभजति। 1. विभक्तावयवम्, 2. अविभक्तावयवम्, 3. अनुकरणञ्च। अत्र विभागानामाशयः प्रतिपदे प्रातिपदिकविधानं स्यात् न तु संज्ञाश्रितो व्यापारः। प्रथमं विभक्तावयवं पुनस्त्रिधोक्तम् – कृद्रूपम्, तद्धितरूपम्, समासरूपञ्च।

**कृद्रूपं विभक्तावयवम्–**

पाणिनिव्याकरणानुसारं तिङ्भिन्नाः प्रत्ययाः कृत्संज्ञकाः भवन्ति।[10] अथ चोक्तं भोजराजेन भावकारकाभिधायिनो धातुप्रत्ययाः कृतः। तत्र–

**(क) भावः–** धात्वर्थ एवापरीभूतो भावः।[11] यदाह– वाक्यपदीये आचार्यो भर्तृहरिः–

**कालानुपाति यद् रूपं धात्वर्थस्य क्रियेति तत्।**
**परितो यत् परिच्छिन्नं तद् भाव इति कथ्यते॥**[12]

स भावः इह षोढा सम्भवति– 1. सिद्धः, 2. साध्यः, 3. सिद्धाऽसमाप्तः, 4. साध्यासमाप्तः, 5. सिद्धसाध्यः, 6. साध्यसिद्धश्च।

**1. सिद्धः–** द्वितीयप्रकाशे भोजः सूत्रमुल्लिख्य सिद्धमित्थं प्रकटयति– उद्भूतप्रत्ययांशत्वेन क्रियानुद्रेकात् सत्त्वभूतत्वं लिङ्गसंख्याद्युपग्राही ''कर्तृकर्मणोः कृति''[13] इति सम्बन्धविभक्तेर्निमित्तं सिद्धः। यथा– ''आश्चर्यमिदमोदनस्य च पाको



ब्राह्मणानां च प्रादुर्भावः, भेदिका काष्ठानां देवदत्तस्य, चिकीर्षा यज्ञदत्तस्य कटस्य इति। अत्र उभयप्राप्तौ कर्मणि''[14] एवेति नियमे उभयोः प्राप्तिर्यस्मिन् कृति इति व्याख्यानात्[15] नियमप्रतिषेधात् कर्तर्यपि षष्ठी भवन्तीति भावस्य सिद्धतां द्योतयति।[16]

पाणिनीये व्याकरणे आचार्यनागेशभट्टः कथयति– ''अत्र केचित्– सिद्धत्वम्'' क्रियान्तराकाङ्क्षोत्थापकतावच्छेदकवैजात्यवत्त्वे सति कारकत्वेन क्रियान्वयित्वे सति कारकान्तरान्वययोग्यत्त्वम्।[17] ननु हरिं नमेच्चेत् सुखं यायात् इत्यत्र क्रियायाः क्रियान्तराकाङ्क्षत्वेन अस्तीति चेन्न चेत् शब्दसमभिव्याहारेण आकाङ्क्षोत्थापनाद् इत्याहुः।

**2. साध्यः–** अथ च साध्यं प्रतिपादयति भोजराजः– उद्भूतप्रकृत्यंशत्वेन क्रियोद्रेकादसत्त्वभूतत्वे लिङ्गसंख्याद्यनुपग्राही 'कर्तृकर्मणोः कारकविभक्तेरेव निमित्तं साध्यः। यथा– ओदनं भोक्तुं याति, स्वाध्यायमधीत्य स्नापयति, पयः पायं पायमास्ते इति। अत एव 'न लोकाव्ययनिष्ठाखलर्थतृनाम्'[18] इत्यादिना षष्ठी निषिध्यते।[19]

पाणिनिव्याकरणशास्त्रेऽपि आचार्यः नागेशः ब्रवीति– साध्यत्वञ्च क्रियान्तराकांक्षानुत्थापकतावच्छेदकं सत् कारकान्तरान्वययोग्यतावच्छेदकरूपत्वम्।[20] अथ च आचार्यनागेशभट्टेन साध्यत्वं नाम निष्पाद्यत्वमिति अङ्गीकृतम्।

**3. सिद्धासमाप्तः–** सिद्धासमाप्तस्य विषये व्यनक्ति भोजः– सिद्ध एव तद्धितानुबन्धी सिद्धासमाप्तः। यथा– व्यावक्रोशी, सांकूटिनम्, कृत्रिमम् इति।[21]

**4. साध्यासमाप्तः–** अथ च तुरीयो भेदः साध्यासमाप्तः भोजमते– साध्य एवानुप्रयोगानुबन्धी साध्यासमाप्तः। यथा– चकासाञ्चकार,विदाङ्कुर्वन्तु, रैपोषं पुष्यति इति।[22]

**5. सिद्धसाध्यः–** पञ्चमः सिद्ध एव साध्यधर्मयोगी सिद्धसाध्यः। यथा– आश्चर्यो गवां दोहोऽशिक्षितेनागोपालेन, साधु खलु पयसः पानं यज्ञदत्तेन, विचित्रा हि सूत्रस्य कृतिः पाणिनिना इति।[23]

**6. साध्यसिद्धः–** अन्तिमः भोजदृशा साध्य एव सिद्धधर्मयोगी साध्यसिद्धः। यथा– कर्त्तव्यं भवता, कार्यं भवतः, कृतं भवतः।[24]

**(ख) कारकम्–** कारकाभिधायिनो धातुप्रत्ययाः। क्रियानिमित्तं कारकम्।[25] पाणिनिव्याकरणशास्त्रेऽपि क्रियते कारकलक्षणम्– क्रियाजनकं कारकम्, क्रियान्वयि कारकम्, एवञ्च क्रियां करोति निर्वर्त्तयति इति कारकम्। अत्र तदपि षोढा– कर्त्ता–

कर्म–करणं–सम्प्रदानम्–अपादानं–अधिकरणञ्चेति। तत्र–

**3. कर्त्ता–** शृङ्गारप्रकाशस्य द्वितीयप्रकाशे कर्त्तुरपि त्रयो भेदास्सन्ति–स्वतन्त्रः, हेतुः, कर्मकर्त्ता च। तेषु–

**स्वतन्त्रः–** क्रियायाः स्वेच्छया करणादीनि यः प्रयुङ्क्ते न तु तैः प्रयुज्यते, स स्वतन्त्रः। यथा– पुत्रस्य दर्शकः, पुरं भेत्तेति।[26] दर्शकः इत्यत्र कर्तरि कारके ण्वुल् प्रत्ययः,[27] भेत्ता इत्यत्र च तृच् प्रत्ययः[28] कर्त्रर्थे भवति स्वातन्त्र्येण।

**हेतुः–** तमेव क्रियाप्रयुक्तं यः प्रयुङ्क्ते स हेतुः। यथा राजानं योधितवान् राजयुध्वा धनुष्मान् अत्र कर्मण्युपपदे क्वनिप् प्रत्ययः।[29] नखानि मोचयन्ति नखमुचानि धनूंषीति इत्यत्र हेतुमति च[30] इत्यनेनसूत्रेण हेतुमदर्थे धातोः कर्तरि कारके णिच् प्रत्ययो भवति।

**कर्मकर्त्ता–** कर्मेव स्वातन्त्र्येण विवक्षितं यत्र कर्मकर्त्ता। यथा– स्वयमेव पच्यन्ते पचेलिमा माषाः, स्वयमेव भयन्ते भङ्गुराणि काष्ठानि इति।[31] इत्यत्र कर्मकर्तरि आत्मनेपदं भवति।

**कर्म–** आचार्यभोजदेवेन कर्मकारकमपि त्रिधा विभज्यते– निर्वर्त्यं, विकार्यं, प्राप्यञ्च।[32] यथा–

**निर्वर्त्यम्–** यदसज्जन्यते सद् वा प्रकाश्यते तन्निर्वर्त्यम्। यथा– कर्त्तव्यः कटः इत्यत्र तयोरेव कृत्यक्तखलर्थाः[33] इति सूत्रेण कर्मणि कारके कृत्यसंज्ञकः प्रत्ययो भवति, अत्र कटः इति निर्वर्त्येर्थे विद्यते। उच्चार्यः शब्दः इत्यत्र च ऋहलोर्ण्यत्[34] इति सूत्रेण कर्मणि कृत्यसंज्ञकः ण्यत् प्रत्ययः।

**विकार्यम्–** यस्य प्रकृत्युच्छेदो गुणान्तरं वोत्पद्यते तद् विकार्यम्। यथा– भुक्त ओदनः, लूयमानः केदारः। भुक्त ओदनः इत्यत्र क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः[35] इति सूत्रेण क्त प्रत्ययः, अत्र भुक्त ओदनः इति विकार्यमस्ति। लूयमानः केदारः इत्यत्र च शानच्[36] प्रत्ययः सम्भवति, कर्मणि केदारस्य विकार्यं भवति अत्र।

**प्राप्यम्–** क्रियाकृतविशेषाऽनवगतौ कर्त्तुः क्रिययाऽनास्थितमास्थितं वा यदाप्यते तत् प्राप्यम्। यथा– दुर्दर्शः प्रभुः, सुयानो मार्गः।[37]

**करणं–** क्रियासिद्धौ प्रकृष्टोपकारकं करणसंज्ञं स्यात्।[38] करणमपि त्रिधा प्रोक्तं भोजराजेन– बाह्यम्, आभ्यन्तरं, बाह्याभ्यन्तरञ्च।



**बाह्यम्–** कर्त्तुः शरीराद् बहिरुपलभ्यमानं बाह्यम्।[39] यथा– आशितं भवं भक्तम्, अत्र आशिते भुवः करणभावयोः[40] इत्यनेन पाणिनिसूत्रेण आशिते सुबन्तोपपदे भूधातोः करणकारके खच् प्रत्ययः। अत्र बाह्योऽर्थः विद्यते। धृतोदकः करकः अत्रापि बाह्यकरणं वर्तते।

**आभ्यन्तरं–** तद्विपरीतमाभ्यन्तरम्। यथा– प्रियंकरणं शीलं, वशीकरणं प्रेम इति।[41] अत्र शीलं प्रेम च आभ्यन्तरविषयोऽस्ति।

**बाह्याभ्यन्तरम्–** उभयगुणयोनि बाह्याभ्यन्तरम्। यथा– दर्शनं चक्षुः संवननं साम इति।[42]

**सम्प्रदानम्–** सम्प्रदाने चतुर्थी[43] भवति। शृङ्गारप्रकाशे सम्प्रदानकारकं त्रिप्रकारकं भवति– ददाति कर्माप्यम्, कर्ममात्राप्यं क्रियाप्यञ्च। तेषु–

**ददाति कर्माप्यम्–** सम्यक् प्रदीयते अस्मै इत्यन्वर्थसंज्ञाया विषयो ददाति कर्माप्यम्। यथा– दीयतेऽस्मै दानीयो ब्राह्मणः देवा देयासुरस्मै देवदायो डिम्भः इति।[44] अत्र ददाति कर्म विद्यते।

**कर्ममात्राप्यम्–** शृङ्गारप्रकाशे कर्मणा यमभिप्रैति स सम्प्रदानम्[45] इति पारिभाषिकसंज्ञामात्रविषयः कर्ममात्राप्यम्।[46] यथा– दाश्यतेऽस्मै देयमिति दाशः कैवर्तः अत्र अनुक्ते सम्प्रदानकारकम्। गां हन्ति तस्मै आगतायेति गोघ्नोऽतिथिः इत्यत्र 'कर्मणः करणंसज्ञा सम्प्रदानस्य च कर्मसंज्ञा'[47] इति महाभाष्यदृशा सम्प्रदानस्य कर्मसंज्ञा भवति।

**क्रियाप्यम्–** कर्मशब्देन क्रियाया अप्युपादानात् क्रियया यदाप्यते तत् क्रियाप्यम्। यथा– श्लाघन्तेऽस्मै जना इति श्लाघ्यो राजा, स्पृहयन्तेस्मै लोकाः इति स्पृहणीयो विभव इति।[48] इत्यत्र क्रियया सम्प्रदानमभिप्रेतमस्ति।

**महाभाष्ये उक्तम्–** क्रियाग्रहणमपि कर्तव्यम्।[49] अर्थात् क्रियया यमभिप्रैति स सम्प्रदानम्।[50]

**अपादानम्–** शृङ्गारप्रकाशे अपादानं निर्दिष्टविषयम्, उपात्तविषयम्, अपेक्षितक्रियञ्च वर्तते। तत्र–

**निर्दिष्टविषयम्–** ध्रुवमपायेऽपादानम् इति निर्दिष्टविषयम्। यथा– प्रपतनो गिरिः, प्रस्रवणः शैलः।[51] गिरिः शैल इति अवधिभूतमपादानसंज्ञकम्।

**उपात्तविषयम्–** भीत्रार्थानां भयहेतुः[52] इत्यादियोगोक्तमुपात्तविषयम्। यथा–

भयानको द्विषाम्, प्रभवः सम्पदाम् इति।[53]

**अपेक्षितक्रियञ्च–** अवधिमात्रार्थमपेक्षितक्रियम्। यथा– अवधिः, पर्वतः, मर्यादा, समुद्र इति।[54] इत्यत्र आङ् मर्यादावचने[55] इत्यनेन अवधिमर्यादा पठिता।

**अधिकरणम्–** कर्तृकर्मद्वारा तन्निष्ठक्रियायाः आधारः कारकम् अधिकरण-संज्ञकं भवति।[56] अधिकरणमिदं त्रिविधमेव वर्णितं भोजराजेन– वैषयिकम्, औपश्लेषिकम्, नैमित्तिकं च। तेषु–

**वैषयिकम्–** विविधमनेकप्रकारं जातिगुणक्रियाद्रव्यादिभिः सिनोतीति। विषयो देशकालादिः, विषय एव वैषयिकम्। यथा– निपिबन्त्यस्मिन् गवादयः इति निपानं जलाशयः, राजानो धीयन्तेऽस्यां राजधानी नगरम् इति।[57] अत्र देशविषयः।

**औपश्लेषिकम्–** उपश्लेषोऽवष्टम्भः, तस्मै प्रभवत्यौपश्लेषिकम्। यथा– इषवो धीयतेऽस्मिन् इषुधिः उपासङ्गम्, शेरतेऽस्यां शय्या पर्यङ्कः।[58]

**नैमित्तिकम्–** निमित्तमेव नेमित्तिकम्। यथा– रज्यन्तेऽस्मिन् सामाजिकमनांसीति रङ्गः प्रेक्षा, प्रसीदन्त्यस्मिन् नयनमनांसीति प्रासादः सौधमिति।[59] आचार्यपतञ्जलिना प्रोक्तम्– निमित्तात् कर्मयोगे सप्तमी वक्तव्या।[60] तेनात्र नैमित्तिकत्वं भजते। यथा–

**चर्मणि द्वीपिनं हन्ति दन्तयोर्हन्ति कुञ्जरम्।**
**केशेषु चमरीं हन्ति सीम्नि पुष्कलको हतः॥**[61]

तदेतदुभयमपि शुद्धम्, संकीर्णम्, उपाधिमत्, रुढिमत्, सम्बन्धि चेति षोढा विप्रथते।[62]

### तद्धितरूपं विभक्तावयवम्–

शृङ्गारप्रकाशस्य द्वितीयप्रकाशे विभक्तावयवस्य द्वितीयभेदस्य तद्धितावयवस्य विषये प्रब्रवीति भोजः-भावकारकसम्बन्धिस्वार्थाभिधायिनोऽधातुप्रत्ययास्तद्धिताः।[63]

**भावतद्धिताः–**तत्र भावो द्विधा– अन्तरङ्गो बहिरङ्गश्चेति। तयोः–

**अन्तरङ्गः–** शब्दस्यार्थे प्रवृत्तिरन्तरङ्गः। यदाह– यस्य गुणस्य हि भावात् द्रव्ये शब्दनिवेशः स तस्य भावः, तदभिधाने त्वतलौ। तस्योपसंग्रहाय संग्रहकारः पठति–

**शब्दे तां जातिं शब्दमेवार्थजातौ जातिः शुक्लादौ द्रव्यशब्दे गुणं तम्।**
**कृत्तत्संयोगं योगि चाभिन्नरूपं वाच्येषु त्वादयो बोधयन्ति॥**[64]



अतः परम् अन्तरङ्गमपि षोढा विभज्यते भोजराजेन– 1. जातिः, 2. गुणः, 3. स्वरूपम्, 4.सम्बन्धः, 5. संहतिः, 6. अभिन्नरूपमिति।[65] इत्येषां षण्णां प्रभेदानाञ्च सविस्तरेण ग्रन्थे प्रकाशयति भोजराजः। तदत्र विवेचनं अनतिविस्तराय नोपादीयतेऽस्माभिः। तेषां नामसंकीर्तनमेव वरम्।

**बहिरङ्गः–** धात्वर्थरूपकृदभिधेयो बहिरङ्गः। सोऽपि षोढा- भावरूपः, कारकरूपः, सम्बन्धिरूपः, भावविशिष्टः, कारकविशिष्टः, संबन्धिविशिष्टश्चेति।[66]

**कारकतद्धिताः–** कारकमपि भाववदेवान्तरङ्गं बहिरङ्गञ्च भवति। तयोराख्याताभिधेयमन्तरङ्गम्। अनाख्याताभिधेयं बहिरङ्गम्।[67] अन्तरङ्गभेदेषु कर्ता, हेतुकर्ता, कर्म च वर्तन्ते। बहिरङ्गभेदेषु करणं सम्प्रदानमपादानमधिकरणञ्च सन्ति। अस्यापि अत्यन्तं विस्तृतं विवेचनमुलभ्यते शृङ्गारप्रकाशे ग्रन्थे।

**समासरूपं विभक्तावयवम्–** अथ पृथगर्थानामेकार्थीभावः समासः। भोजदृशा स त्रिधा–प्राकृतः, वैकृतः, शेषश्च।[68] समासरूपं विभक्तावयवं शब्दान्तरैः विवेचयामास भोजदेवः। पारम्परिकानेव समासप्रकारान् विवेचयति प्राकृतादिभेदोप-निबद्धान्। यथा–

**प्राकृतः–** समस्तपदानामव्ययीभावादिसंज्ञानिमित्तं पूर्वपदप्रधानिकप्रकृतिः, तत्र भवः प्राकृतः। स चतुर्धा अव्ययीभावः, तत्पुरुषः, बहुब्रीहिः द्वन्द्व इति।[69]

**वैकृतः–** प्रकृतेरन्यथात्वं विकृतिः, तत्र भवो वैकृतः। सोऽपि चतुर्धा– प्राधान्यविपरीतः, सामर्थ्यविपरीतः, वाक्याधिकारार्थः, अर्थान्तरगामी च।[70] अथ च तृतीयः–

**शेषः–** उदाहृतप्रकाराभ्यामन्यः शेषः। स चतुर्धा– सूत्रशेषः, असूत्रशेषः, ज्ञापकशेषः, एकशेषश्च।[71]

### अविभक्तावयवं प्रातिपदिकम्–

इदानीम् अविभक्तावयवमुच्यते। भोजानुसारं तदपि त्रिधैव– नामरूपं, अव्ययरूपं, निपातरूपं च। तत्र–

**नामरूपम्–** अनपेक्षितशब्दव्युत्पत्तीति सत्त्वभूतार्थाभिधायीनि च नामानि।[72] निरुक्तकारः यास्कोऽपि बभाषे–सत्त्वप्रधानानि नामानि।[73] एवमेव मञ्जूषायां लिङ्गमपि नामार्थः। प्रत्ययानां द्योतकत्वम्। अन्यथा वाग्, उपानद्, आदिशब्देभ्यः ''इयं तव वाग्'' इति स्त्रीत्वबोधनापत्तेः। अयम् इति व्यवहारविषयकं पुंस्त्वम्। इयम्

इति व्यवहारविषयकं स्त्रीत्वम्। इदमिति व्यवहारविषयकं स्त्रीत्वम्। इति विलक्षणं शास्त्रीयं स्त्रीपुन्नपुंसकत्वम्। अत एव खट्वादिशब्दवाच्यस्तनकोशादिमत्त्वरूप-लौकिकस्त्रीत्वाभावेऽपि तद्वाचकात् टाप् प्रत्ययः।[74] इत्यस्मिन् विषये भर्तृहरिणापि प्रोक्तम्–

**भावतत्त्वदृशः शिष्टाः शब्दार्थेषु व्यवस्थिताः।**
**यद्यद् धर्मेऽङ्गतामेति लिङ्गं तत्तत् प्रचक्षते॥**[75]

संख्यापि नामार्थः विभक्तीनां द्योतकत्वात्।[76] आदिर्ञिटुडवः[77] इत्यस्मिन् पाणिनिसूत्रेऽपि आदिः इति बहुत्वे एकवचनम्। वाच्यत्वान्वयव्यतिरेकाभ्यां 'जसम्' विना नामार्थबहुत्वप्रतीत्यभावापत्तेः। तानि च नामानि त्रिधा विभज्यन्ते आचार्येण– एकार्थानि, अनेकार्थानि, एकानेकार्थानि च इति। तत्र–

**एकार्थानि–** यथा वृक्षः इति पुंसि[78] लिङ्गे। 'पेड़' इति भाषायाम्। उक्तञ्चामरकोषे–

**वृक्षो महीरुहः शाखी विटपी पादपस्तरुः।**
**अनाकहः कुटः सालः पलासी दुद्रुमागमाः॥**[79]

एकार्थवाचिषु शब्देषु कुमारी इति स्त्रियाम्, कुमारी इति अविवाहिता स्त्री अर्थात् कन्या। उक्तञ्च 'सहा कुमारी तरणि' इति अमरकोषः।[80] कुण्डम् इति नपुंसकलिङ्गम्।[81] शुक्लः इति त्रिषु लिङ्गेषु प्रयुज्यन्ते, गुणशब्दोऽयम्।[82] 'सफेद' इति भाषायाम्। इन्द्रस्य मरुत्वान् मघवा विडौजाः, पाकशासनः इत्यादयः चत्वारिंशत् नामानि सन्ति।[83] शक्र इति इन्द्रस्य नाम।[84] पुरन्दर इत्यपि इन्द्रस्य नाम। कोष्ठः इति अन्तर्जरठम् कुसूलोन्तर्गृहं तथा[85] सर्वेऽप्येते शब्दाः एकार्थ-वाचकास्सन्ति।[86]

**अनेकार्थानि–** यथा अक्षाः इति रथाङ्गे वृक्षभेदादौ च प्रयुक्ताः भवन्ति।[87] एवमेव माषाः, पादाः, अवयः, हरयः, गावः, भूतयः, पुण्डरीकम्, ललाम इत्येते शब्दाः अनेकार्थवाचकास्सन्ति।[88]

**एकानेकार्थानि–** दस्रौ इति अश्विनौ यथोक्तं अमरकोषे 'नासत्यावश्विनौ दुस्रावश्विनेयौ च तावुभौ।[89] रोदसी इत्यस्याः भूद्यावौरोदस्यौ रोदसी च ते इति द्वौ अर्थौ स्तः।[90] दाराः इति स्त्री भवति। पत्नी पाणिगृहीती च द्वितीया सहधर्मिणी भार्या जायाथ पुंभूम्नि दाराः इति अमरकोषे।[91] अथ च नासत्यौ, पुष्पवन्तौ,



उभौ, वर्षः, आपः, वनम्, पङ्क्तिः, सेना इत्येतेऽप्येकार्थवाचकाश्शब्दाः वर्तन्ते।[९२]

**अव्ययरूपम्–** प्रायेणालिङ्गसंख्याशक्तीनि अव्ययानि। यथा प्रोवाच महर्षिः पतञ्जलिः–

**सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु।**
**वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्॥**[९३]

**तान्यपि त्रिधा–**द्रव्यवचनानि, गुणवचनानि, सम्बन्धवचनानि चेति। तेषु–

**द्रव्यवचनानि–** स्वः, प्रातर्, दिवा, दोषा, नक्तम्, सायम्, विहायसा, कम्, शम्, मय इति।[९४] यथा मृच्छकटिके शूद्रकः प्रोवाच– **वञ्चना परिहर्त्तव्या बहुदोषा हि शर्वरी।**[९५]

**गुणवचनानि–** यथा उच्चैः, नीचैः, सुष्ठु, मुधा, मृषा, मिथ्या, अलम्, बलवत्, पृथक्, विष्वक् इति। यथा संस्कृतसाहित्ये महाकविभासस्य स्वप्नवासवदत्ते अव्ययरूपो नीचैश्शब्दः प्रयुज्यते। तद्यथा–

**नीचैः गच्छत्युपरि च दशा चक्रनेमिक्रमेण।**[९६]

**सम्बन्धवचनानि–** सम्बन्धवचनेष्वव्ययेषु यथा समया,निकषा, बहिः, अन्तः, अन्तरेण, ऋते, आरात्, युगपत्, साकम्, सार्धम्, सह इत्येते सन्ति।

संस्कृतसाहित्ये अव्ययरूपाणां विभागानां द्रव्यगुणसम्बन्धानाञ्च तेषां प्रयोगः प्रायः सर्वत्र संदृश्यते। यथा– महाकविकालिदासस्य मेघदूते प्रयुक्तान्यव्ययरूपाणि–

**तस्योत्सङ्गे प्रणयिन इव स्रस्तगङ्गादुकूलां,**
**न त्वं दृष्ट्वा न पुनरलकां ज्ञास्यसे कामचारिन्।**
**या वः काले वहति सलिलोद्गारमुच्चैर्विमाना,**
**मुक्ताजालग्रथितमलकं कामिनीवाभ्रवृन्दम्॥**[९७]

अथ च–

**नत्वात्मानं बहु विगणयन्नात्मनैवावलम्बे,**
**तत्कल्याणि! त्वमपि नितरां मा गमः कातरत्वम्॥**[९८]

**निपातरूपम्–** निपातरूपेषु अव्ययेषु असत्त्ववचनाश्चादयो निपाताः। तेऽपि त्रिधैव– स्वतन्त्राः, परतन्त्राः, विशेषपरतन्त्राश्च। तेषु–

**स्वतन्त्राः–** अस्त्यादयः स्वतन्त्राः। यथा– अस्ति, असि, अस्मि, एहि,

ब्रूहि, मन्ये, जाने, पश्य, पश्यत्, स्यात् इति।[९९] यथा कविताकामिन्याः विलासस्य कालिदासस्य महाकाव्ये कुमारसम्भवे स्वतन्त्रनिपातानां केचन प्रयोगाः लभन्ते। यथोदाहरणानि–

**अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः।**
**पूर्वापरौ तोयनिधी वगाह्य स्थितः पृथिव्या इव मानदण्डः॥**[100]

एवञ्च कालिदासस्यैव मेघदूत एव। तदेवम्प्रकारेण–

**वक्रः पन्था यदपि भवतः प्रस्थितस्योत्तराशां,**
**सौधौत्सङ्गप्रणयविमुखो मा स्म भूरुज्जयिन्याः।**
**विद्युद्दामस्फुरितचकितैस्तत्र पौराङ्गनानां**
**लोलापाङ्गं यदि न रमसे लोचनैर्वञ्चितोऽसि॥**[101]

इत्थम् अस्त्यादीनां स्वतन्त्राव्ययानां प्रायः प्राचुर्येण प्रयोगो दरीदृश्यते संस्कृत-साहित्यपटले।

**परतन्त्राः–** कर्मप्रवचनीयाश्चादयः परतन्त्राः। यथा– वृक्षमनु विद्योतते, उपार्जुनं योद्धारः, यदत्र मां प्रतिस्यात्, अहं च त्वं च वृत्रहन्, सरोजमिव ते मुखम्, न नूनमस्ति नोश्वः,[102] कः स्विदेकाकी चरति।[103]

**विशेषपरतन्त्राः–** अव्ययेषु गतिप्रादयो विशेषपरतन्त्राः। यथा– प्रकरोति, पराकरोति, ऊरीकरोति, पटपटाकरोति, पुरस्करोति, तिरस्करोति, अन्तर्धिः इति।[104]

संस्कृतसाहित्ये नैकैः कविश्रेष्ठैः गतिसंज्ञकानां विशेषपरतन्त्रनिपातानां संप्रयोगो विविधप्रकारैः विधीयते। यथा मेघदूत एव–

**मन्दाकिन्याः सलिलशिशिरैः सेव्यमाना मरुद्भि–**
**र्मन्दाराणामनुतटरुहां छायया वारितोष्णाः।**
**अन्वेष्टव्यैः कनकसिकतामुष्टिनिक्षेपगूढैः,**
**संक्रीडन्ते मणिभिरमरप्रार्थिना यत्र कन्याः॥**

अथ च–

**धूमाद्गारानुकृतिनिपुणा जर्जरा निष्पतन्ति॥**

एवञ्च–

**व्यालुम्पन्ति स्फुटजललवस्यन्दिनश्चन्द्रकान्ताः॥**[105]



इत्येतेषु पद्येषु पादेषु वा संक्रीडन्ते, निष्पतन्ति, व्यालुम्पन्ति च गतिसंज्ञकाः विशेषपरतन्त्राः प्रयोज्यमानाः निपातास्सन्ति।

### ३. अनुकरणप्रातिपदिकम्–

प्रतिपदिकसमुच्चये अथ चान्तिमं शृङ्गारप्रकाशे अनुकरणमपि एकं प्रातिपदिकम् अङ्गीचकार आचार्यः। अनुकरणं तदपि त्रिधैव– साध्वनुकरणम्, असाध्वनुकरणम्, अव्यक्तानुकरणञ्च।

**साध्वनुकरणम्–** तत्र साध्वनुकरणं द्वेधा सार्थकं निरर्थकं च[106] भवति।

सार्थकं यथा– द्विःपचत्वित्याह अग्नी इत्याह, पचतीत्याह। अत्र सार्थकत्वात् तिङ्ङतिङः[107] इति निघातः, अर्थात् अतिङन्तात् पदादुत्तरं तिङन्तपदमनुदात्तं भवतीति। ''ईदूदेद्द्विवचनं प्रगृह्यम्''[108] इति प्रगृह्यत्वम्, तिङन्तत्वादप्रातिपदिककार्यत्वे सुबुत्पत्तिश्च न भवतीति।[109]

निरर्थकं यथा– सुः पूजायाम्[110] सु शब्दः पूजायामर्थे कर्मप्रवचनीयसंज्ञो भवति। यथा– सुसिक्तं भवता, सुस्तुतं भवता। अपि पदार्थसम्भावनान्ववसर्गगर्हा-समुच्चयेषु[111] इत्यत्र च 'अपि' कर्मप्रवचनीयसंज्ञो भवति। यथा– अपि सिञ्चेत् मूलकसहस्रम्, अपि स्तूयात् राजानम्। अत्रार्थस्यानुकरणात् स्वस्वरूपत्वाच्च प्रातिपदिकत्वे सुपः श्रवणं भवतीति।[112]

**असाध्वनुकरणं–** भोजः द्वितीयम् असाध्वनुकरणं द्विधा प्रतिपादयति– अशक्तिजम्, अपभ्रंशश्च।

**अशक्तिजं यथा–** अहो ऋतक् इति वक्तव्ये शक्तिवैकल्यात् अहो ऌतक् इति प्रयुङ्क्ते तदन्योनुकरोति कुमार्य ऌतक् इत्याह इति। यच्चाशक्तिजमसाधु शब्दरूपं तदनुकरणस्यापि साधुत्वमिष्यते।[113]

**अपभ्रंशो** यथा– हेरयो हेरय इति वक्तव्ये असुराः हेलयो हेलय इति वदन्तः पराबभूवुः।[114] तस्मात् ब्राह्मणेन न म्लेच्छितवै नापभाषितवै। म्लेच्छो त एष यदप शब्दः। एकैकस्य शब्दस्य बहवः अपभ्रंशाः।[115] तद्यथा गौरित्यस्य गावीगोणी-गोता-गोपोतलिकेत्येवमादयोपभ्रंशाः भवन्ति। एतेष्वपि प्रातिपदिकत्वं प्रतिष्ठते।

**अव्यक्तानुकरणं–** अव्यक्तमनुकरणं भोजदृशा द्विप्रकारकमेव भवति– निरुल्लेखं सोल्लेखञ्च। तयोः–

निरुल्लेखं यथा– पटत्पटदिति करोति पटपटायते इत्यत्र अव्यक्तानुकरणाद्

द्व्यजवरार्धादनितौ डाच्[116] इत्यनेन पाणिनिसूत्रेण डाच् प्रत्ययो भवति कृभ्वस्तियोगे। एवमेव दमदमा कराति, दमदमा स्यात् इत्यादयः निरुल्लेखाः।[117]

सोल्लेखं यथा– उल्लेखेन प्रवचनेन वा सहितं सोल्लेखम् अर्थाद्यत्र कथनं क्रियते। तत्सोल्लेखं शृङ्गारप्रकाशानुसारेण तदेतदेवैषा दैवी वागनुवदति स्तनयित्नुर्ददद इति। दाम्यत, दत्त, दयध्वमिति तदेतत्त्रयं शिक्षेद् दमं दानं दयामीति[118] सन्ति।

इत्थमत्र अस्य प्रातिपदिकस्य क्वचिद् विस्तरेण अनतिविस्तरेण च क्वचिद् शास्त्रदृशा अभीष्टं विवेचनं विधत्तमस्माभिः।

***

## सन्दर्भाः


1. पा. अष्टाध्यायी, 1.2.45
2. पा. अष्टाध्यायी, 1.2.47
3. पा. अष्टाध्यायी, 1.3.46
4. पा. अष्टाध्यायी, 1.4.71
5. पा. अष्टाध्यायी, 8.2.7
6. पा. अष्टाध्यायी, 8.4.11
7. अर्थवदधातुप्रत्ययः प्रातिपादिकम्,पा. अ. 1.2.45
8. कृत्तद्धितसमासाश्च, पा. अ. 1.2.46
9. महाभाष्यम्
10. कृदतिङ्
11. शृङ्गारप्रकाशः, द्वितीयप्रकाशः,पृ.67, सम्पादकौ प्रो.रेवाप्रसाद द्विवेदी, प्रो.सदाशिव कुमार द्विवेदी च, कालिदाससंस्थानम्
12. वाक्यपदीयम् 3.8.12
13. पा. अष्टाध्यायी, 2.3.55
14. पा. अष्टाध्यायी, 2.3.66
15. महाभाष्यम्, 2.3.66
16. शृङ्गारप्रकाश, द्वि.प्र., पृ.67
17. परमलघुमञ्जूषा, पृ.144





18. पा. अष्टाध्यायी, 2.3.69
19. शृङ्गारप्रकाश, द्वि.प्र., पृ.68
20. परमलघुमञ्जूषा, पृ.144
21. शृङ्गारप्रकाश, द्वि.प्र., पृ.68
22. तत्रैव
23. शृङ्गारप्रकाश, द्वि.प्र., पृ.69
24. शृङ्गारप्रकाश, द्वि.प्र., पृ.69
25. शृङ्गारप्रकाश, द्वि.प्र., पृ.72
26. शृङ्गारप्रकाश, द्वि.प्र., पृ.73
27. पा. अष्टाध्यायी, 3.1.33
28. पा. अष्टाध्यायी, 3.1.33
29. शृङ्गारप्रकाश, द्वि.प्र., पृ.73
30. पा. अष्टाध्यायी, 3.1.26
31. शृङ्गारप्रकाश, द्वि.प्र., पृ.73
32. तत्रैव
33. पा. अष्टाध्यायी, 3.4.70
34. पा. अष्टाध्यायी, 3.4.124
35. पा. अष्टाध्यायी, 3.4.76
36. लटः शतृशानचावप्रथमासमानाधिकरणे, पा. अष्टाध्यायी, 3.4.124
37. शृङ्गारप्रकाश, द्वि.प्र., पृ.73
38. साधकतमं करणम्, पा. अष्टाध्यायी, 1.4.42
39. शृङ्गारप्रकाश, द्वि.प्र., पृ.73
40. पा. अष्टाध्यायी, 3.2.45
41. शृङ्गारप्रकाश, द्वि.प्र., पृ.73
42. तत्रैव
43. पा. अष्टाध्यायी, 2.3.13
44. शृङ्गारप्रकाश, द्वि.प्र., पृ.73
45. पा. अष्टाध्यायी, 1.4.32
46. शृङ्गारप्रकाश, द्वि.प्र., पृ.73
47. महाभाष्यम्, 1.331
48. शृङ्गारप्रकाश, द्वि.प्र., पृ.74
49. महाभाष्यम्, 1.330

50. वार्तिकम्
51. शृङ्गारप्रकाश, द्वि.प्र., पृ.74
52. पा. अष्टाध्यायी, 1.4.25
53. शृङ्गारप्रकाश, द्वि.प्र., पृ.74
54. तत्रैव
55. पा. अष्टाध्यायी, 1.4.89
56. पा. अष्टाध्यायी, 1.4.45
57. शृङ्गारप्रकाश, द्वि.प्र., पृ.74
58. तत्रैव
59. तत्रैव
60. महाभाष्यम्, 1.4.58
61. महाभाष्यम्
62. शृङ्गारप्रकाश, द्वि.प्र., पृ.74
63. तत्रैव, पृ.77
64. वाक्यपदीयम् 5.51/119
65. शृङ्गारप्रकाश, द्वि.प्र., पृ.77
66. तत्रैव, पृ.79
67. तत्रैव, पृ.82
68. शृङ्गारप्रकाश, द्वि.प्र., पृ.104
69. तत्रैव
70. तत्रैव, पृ.106
71. तत्रैव, पृ.108
72. शृङ्गारप्रकाश, द्वि.प्र., पृ.9
73. निरुक्तम् 1.1.3, पृ.3
74. परमलघुमञ्जूषा, नामप्रकरणम्, पृ.388
75. वाक्यपदीयम्
76. परमलघुमञ्जूषा, नामप्रकरणम्, पृ.391
77. पा. अष्टाध्यायी, 1.3.5
78. लिङ्गसूत्रम्, सं.93
79. अमरकोष, 2.4.5
80. तत्रैव, 2.4.73
81. लिङ्गसूत्रम्, सं.93



82. तत्रैव, सं.187
83. अमर., 1.1.41
84. अमर., 1.1.41
85. अमर., 3.3.40
86. शृङ्गारप्रकाश, द्वि.प्र., पृ.119
87. तत्रैव
88. तत्रैव
89. अमर., 1.1.51
90. अमर., 3.3.229
91. अमर., 2.6.5
92. शृङ्गारप्रकाश, द्वि.प्र., पृ.119
93. महाभाष्यम्, 1.1.38
94. शृङ्गारप्रकाश, द्वि.प्र., पृ.119
95. मृच्छकटिकम्, 1.58
96. स्वप्नवासवदत्तम्
97. तत्रैव उ.मेघ.
98. तत्रैव उ.मेघ.
99. शृङ्गारप्रकाश, द्वि.प्र., पृ.120
100. कुमारसम्भवम्,1.1
101. मेघदूतम्, पू.मेघ 27
102. शृङ्गारप्रकाश, द्वि.प्र., पृ.120
103. तैत्तिरीयसंहिता, 7.4.18.1
104. शृङ्गारप्रकाश, द्वि.प्र., पृ.120
105. मेघ. उ.मे., 6.8.9
106. शृङ्गारप्रकाश, द्वि.प्र., पृ.120
107. पा. अष्टाध्यायी, 8.1.28
108. पा. अष्टाध्यायी, 1.1.11
109. शृङ्गारप्रकाश, द्वि.प्र., पृ.120
110. पा. अष्टाध्यायी, 1.4.94
111. तत्रैव, 1.4.96
112. शृङ्गारप्रकाश, द्वि.प्र., पृ.121
113. तत्रैव
114. तत्रैव
115. म.भा.पस्पशाह्निकम्
116. पा. अष्टाध्यायी, 5.4.57
117. शृङ्गारप्रकाश, द्वि.प्र., पृ.121
118. तत्रैव

***

# महाकवेः कालिदासस्य रचनासु अव्ययपदप्रयोगसौष्ठवविमर्शः

**वरदा वसा**

## 1. प्रस्तावना

कविकुलगुरुर्महाकविः कालिदासो रससिद्धः कवीश्वररूपेण सुप्रसिद्धो विशेषरूपेण शृङ्गाररसचित्रणे सिद्धहस्त इति वयं जानीमः। 'उपमा कालिदासस्य' इति सूक्त्यनुसारमलङ्कारयोजनायां तस्य वैशिष्ट्यमस्तीति सर्वजनविदितं सत्यमस्ति। तथैव वैदर्भीरीत्याः प्रयोगनैपुण्यमपि महाकवेः कालिदासस्यास्तीति काव्यशास्त्रमर्मज्ञैराचार्यैः स्पष्टं प्रतिपादितम्। विविधच्छन्दसां विशिष्टप्रयोगनैपुण्येन कालिदासभारती सर्वदा सहृदयहृदयान् समाकर्षतीति विषये विदुषामैकमत्यमपि दृष्टिगोचरं भवति। एतानि सर्वाणि महाकवेरलौकिकप्रतिभाया निदर्शनानि सन्ति तथा च एतैः कारणैर्युगे-युगे महाकवेः कृतीनां मूल्यह्रासः कदापि न भवति। यथा युवानः कालिदाससाहित्यं सम्पठ्य सद्यः परनिर्वृतिं लभन्ते तथैव च काव्यामृतपिपासवा रसिका वृद्धाः परमानन्दं लभन्ते। यथार्थेन कथितमस्ति–

**अस्पृष्टदोषा नलिनीव हृद्या प्रियाङ्कपालीव विमर्दरम्या।**
**हारावलीव लसिता गुणोघैर्न कालिदासादपरस्य वाणी॥**

रसगङ्गाधरस्य प्रणेता पण्डितराजजगन्नाथः काव्यलक्षणं निर्माय वदति – 'रमणीयार्थप्रतिपादकः शब्दः काव्यम् । अस्मिन् लक्षणे शब्दानां प्राधान्यं तेन प्रदत्तं ये शब्दा रमणीयार्थप्रतिपादका भवन्ति, ये शब्दा लोकोत्तरसौन्दर्यप्रतिपादनसमर्था भवन्ति तेषां शब्दानां चयनं महाकविः कालिदासः कृतवानिति हेतोस्तस्य वाणी अलौकिकसौन्दर्यं विधत्ते। तथैव आचार्यवामनोऽपि तस्य 'विशिष्टपदसंयोजना रीति'रिति लक्षणे विशिष्टानां पदानां महत्त्वं प्रतिपादयति। अस्मिन्नेव सन्दर्भे महाकवि-



नीलकण्ठदीक्षितो वदति–

**यानेव शब्दान् वयमुच्चरामो यानेव चार्थान् वयमुल्लिखामः।**
**तैरेव विन्यासविशेषभव्यैः सम्मोहयन्ति कवयो जगन्ति॥**

## 2. शोधपत्रस्योद्देश्यम्

प्रश्नः स्वतो भवति कथमियं कालिदासस्य वाणी असाधारणसौन्दर्यसम्पन्ना किञ्च तत्र कारणम् । अस्मिन् शोधपत्रे महाकवेः कालिदासस्य शब्दविन्याससौष्ठवं प्रतिपादयितुमभिलषामि। विशेषरूपेण तस्य काव्येषु प्रयुक्तानामव्ययपदानां प्रयोगजन्यां चमत्कृतिमाविष्कर्तुं ममायं प्रयत्नः। शब्दप्रयोगनैपुण्यदृष्ट्या कालिदाससाहित्यस्य यादृशं गहनाध्ययनमपेक्ष्यते न तादृशं सञ्जातमिति मे विश्वासः। अस्मिन्नेव शोधपत्रे कालिदासेन कृता अव्ययपदानां प्रयोगविन्यासभव्यता मया प्रदर्शिता। तेषां समुचितप्रयोगकौशलेन कालिदासभारती अन्येभ्यो महाकविभ्यो नितरां भिन्ना विभाति। कालिदासेन स्वचरितवाङ्मयेऽव्ययपदानां नाना प्रकारेण, नवीनरीत्या समुचितप्रयोगः कृतः। शोधपत्रेऽहं कालिदासस्य साहित्येष्वव्ययपदानां प्रयोगः कथमस्ति, अव्ययाः कस्मिन् अर्थे प्रयुक्ताः, तेषामुद्देशमित्यादीनां चर्चां करिष्यामि।

## 3. अव्ययपदस्य व्याख्या

न व्येति इति अव्ययम्। यत् पदं त्रिषु लिङ्गेषु त्रिषु वचनेषु समानं भवति तत् पदमव्ययम्। अत्र किं नाम अव्ययमिति चेत् कथ्यते–

**सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु।**
**वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्॥**

अर्थात् येषां पदानां सुप्तिङादिविकाराः न भवन्ति तथा च येषां नाना अर्थाः सन्ति तानि अव्ययानि। वस्तुतः अव्ययसंज्ञा एका बृहती संज्ञास्ति। अस्य व्याख्या पाणिनिना अष्टाध्याय्यां कृता–

**स्वरादिनिपातमव्ययम्॥** अष्टाध्यायी 1.1.37

स्वरादिशब्दाः पाणिनेर्गणपाठे वर्णितास्तथा च निपाता अष्टाध्याय्याः प्रथमाध्यायस्य चतुर्थपादस्य षट्पञ्चाशत् सूत्रतोऽष्टनवतिसूत्रपर्यन्तं निर्दिष्टाः सन्ति। निपातस्य लक्षणमस्ति–

**इयन्त इति संख्यानां निपातानां न विद्यते।**
**प्रयोजनवशादेते निपात्यन्ते पदे पदे॥**

अर्थात् इ, उ आदिशब्दानां प्रयोजनवशात् निपातसंज्ञा भवति।

सर्वप्रथमन्तु स्वरादिगणपठितानामव्ययानां चर्चा प्रस्तूयते। स्वरादिगणस्य कानिचन अव्ययानि अत्र संगृहीतानि सन्ति।

**4. 'पुरा' शब्दस्य प्रयोगः**

'पुरा' शब्दः सामान्यतया भूतकालस्य सूचको भवति। किन्तु अस्य प्रयोगो भविष्यत्कालस्य घटनां दर्शयितुं कालिदासेन कृतः। यथा मेघदूते-

**आलोके ते निपतति पुरा स बलिव्याकुला वा॥** उत्तरमेघः, 25

यदा विरहदग्धो यक्षो मेघं स्वभार्याया विषयं सूचयति तदा तां वर्णयितुं स कथयति यद् अलकानगर्यां त्वमेकां नारीं द्रक्ष्यसि या पूजाकर्मणि व्यापृता भविष्यति सा एव मम भार्या। अत्र पुरा शब्दो न भूतकालवाचकः अपितु भविष्यत्कालवाचकः। पाणिनिनापि उक्तं यद् भविष्यकालेऽपि लट्लकारस्य प्रयोगो भवति–

**यावत्पुरानिपातयोर्लट्॥** अष्टाध्यायी 3.3.4

अपरमुदाहरणमस्ति अभिज्ञानशाकुन्तलस्य। मारीचः शकुन्तलां कथयति यत् तस्याः पुत्रो भरतो भविष्यति। यः महतीं कीर्तिमर्जयित्वा सप्तद्वीपां पृथ्वीं विजेष्यति। अस्य सूचनार्थं 'पुरा' इत्यव्ययं प्रयुक्तम्–

**पुरा सप्तद्वीपां जयति वसुधामप्रतिरथः॥** अभि.शा.7.33

**5. 'अन्तरेण' शब्दस्य प्रयोगः**

अस्याऽव्ययस्य साधारणोऽर्थोऽस्ति 'विना' इति। किन्तु प्रश्नहेतावपि अस्य प्रयोगोऽभिज्ञानशाकुन्तले दृश्यते। यदा विदूषकेण शकुन्तलाविषये राज्ञो दुष्यन्तस्य प्रीतिरवगम्यते तदा स दुष्यन्तं शकुन्तलाया मनोभावान् ज्ञातुं पृच्छसि। अस्याम् उक्त्यामन्तरेणेत्यव्ययं प्रश्नार्थसूचकमस्ति–

**अथ भवन्तमन्तरेण कीदृशस्तस्या दृष्टिरागः?....।** (द्वितीयोऽङ्कः)

**6. 'अथ' शब्दस्य प्रयोगः**

'अथ अव्ययस्य सप्त अर्था निर्दिष्टाः। आरम्भः, अनन्तरं, विकल्पः, प्रश्नः, समुच्चयः, यदि तथा च मङ्गलम्। 'अथ' अव्ययमारम्भार्थे प्रायशः प्रयुज्यते। आनन्तर्येऽपि तस्य प्रयोगो बहुधा दृश्यते यथा रघुवंशे- '**अथ प्रजानामधिपः प्रभाते**' तथा च कुमारसम्भवे- '**अथावमानेन पितुः प्रयुक्ताम् ....।** किन्तु प्रश्नरूपेणास्याव्ययस्य प्रयोगः सुन्दररीत्या अभिज्ञानशाकुन्तले क्रियते कविना। अत्र 'अथ' पदमौचित्यं प्रकटयति। यदा दुष्यन्तो भरतस्य पराक्रमेण सम्मोहितो



भूत्वा तस्य मातुर्विषये जिज्ञासां प्रदर्शयति सत्यमन्विष्यति च तदा राज्ञो मनोभावाः 'अथ' पदेन व्यक्ता भवन्ति। तेनैव च वाक्यार्थसौन्दर्यमभिवर्धते। अभिज्ञान-शाकुन्तलस्य वाक्यद्वयमत्र प्रस्तूयेते–

**अथ सा तत्र भवती किमाख्यस्य राजर्षेः पत्नी?** (सप्तमोऽङ्कः)

तथा च

**न चेन्मुनिकुमारोऽयम् अथ कोऽस्य व्यपदेशः?** (सप्तमोऽङ्कः)

**7. 'मिथस् = मिथः' शब्दस्य प्रयोगः**

मिथः शब्दस्य अर्थः प्रायः 'परस्परम्' भवति। परन्तु 'मिथः' शब्दस्यापरोऽर्थः 'एकान्त'मपि विद्यते।

अस्मिन्नेवार्थे कालिदासेन मिथः शब्दः प्रयुक्तः। यथा–

**रत्नाकरं वीक्ष्य मिथः स जायां रामाभिधानो हरिरित्युवाच॥** रघुवंशम्13.1

किन्तु सञ्जीवनीटीकानुसारमत्र मिथः शब्दो गोष्ठीं मन्त्रणां वा सूचयति। यथा निर्दिष्टं सञ्जीवनीटीकायां **मिथो ग्रहणं गोष्ठीविश्रम्भसूचनार्थम्।**

कुमारसम्भवेऽपि उक्तम्–

**भर्तुः प्रसादं प्रतिनन्द्य मूर्ध्ना वक्तुं मिथः प्राक्रमतैवमेनम्।**। 3.2

कुमारसम्भवे यदा कामदेवः इन्द्रस्य सामीप्यं प्राप्य गुप्तमन्त्रणां करोति तदा तत् प्रदर्शयितुं 'मिथः' अव्ययस्य प्रयोगः क्रियते कालिदासेन।

**8. 'च' शब्दस्य प्रयोगः**

च अव्ययस्य नैकेऽर्थाः सन्ति। तेषु 'समुच्चयः' सामान्योऽर्थः। अस्मिन्नेवार्थे 'च' निपातस्य प्रयोगो रघुवंशेऽस्ति यथा राजा दिलीपस्तथा तस्य सारथिः कामधेनोः शापं न शृणोति तदा–

**स शापो न त्वया राजन् न च सारथिना श्रुतः॥** रघु.1.78

अत्र समुच्चयार्थे 'च' इति अव्ययं प्रयुक्तम्। 'इतरेतरयोगे'ऽपि 'च' अव्ययं प्रयुक्तम्, यथा रघुवंशे–

**तयोर्जगृहतुः पादान्राजा राज्ञी च मागधी।**
**तौ गुरुर्गुरुपत्नी च प्रीत्या प्रतिननन्दतुः॥** रघु.1.57

अस्याव्ययस्य अपरोऽर्थः 'परन्तु' अस्ति। अभिज्ञानशाकुन्तले यदा राजा दुष्यन्तः कण्वर्षेः आश्रमं प्रविशति तदा तस्य बाहुस्फुरणं जातम् । यथोदाहरणम्-

**शान्तमिदमाश्रमपदं स्फुरति च बाहुः कुतः फलमिहास्य।**। अभि.शा.1.16

अस्मिन् वाक्ये च शब्दः 'परन्तु' अर्थे प्रयुक्तः। 'च' अव्ययं 'यस्मिन्नेव क्षणे' इत्यर्थेऽपि भवति। अस्मिन् अर्थे 'च' पदस्य प्रयोगो रघुवंशे दृश्यते। यदा विष्णुः क्षीरसागरं प्रत्यागच्छति तस्मिन्नेव क्षणे देवास्तत्र समुपस्थिता भवन्ति। अत्र 'च' पदस्य प्रयोगः 'अनु' इति कर्मप्रवचनीयस्य सदृशो विद्यते।

**ते च प्रापुरुदन्वन्तं बुबुधे चादिपुरुषः॥** 10.6

**9. 'वा' शब्दस्य प्रयोगः**

वा अव्ययं सामान्यतया विकल्पार्थे प्रयुज्यते। यथोक्तमष्टाध्याय्यां -

**नवेति विभाषा॥** अष्टाध्यायी 1.1.44

किन्तु 'वा' शब्दः 'इव' अथवा 'सदृशे' अर्थे मेघदूते प्रयुक्तः। यथा–

**जातां मन्ये शिशिरमथितां पद्मिनीं वान्यरूपाम्॥** उत्तरमेघः 23

**10. 'किल' शब्दस्य प्रयोगः**

किल अव्ययस्य अनेके अर्थाः सन्ति। तेषु एकोऽर्थोऽस्ति 'वार्त्ता' 'भूतपूर्वघटना' वा। यथा रघुवंशे–

**बभूव योगी किल कार्त्तवीर्यः॥** 6.38।।

अत्र किल शब्दो वार्तां द्योतयति।

निश्चयार्थेऽपि किल प्रयुक्तम्। यथा अभिज्ञानशाकुन्तले-

**इदं किलाव्याजमनोहरं वपुः॥** अभि.शाकु.1.18

**11. 'बत' शब्दस्य प्रयोगः**

बत अव्ययस्य प्रयोगो नैकेषु स्थानेषु लभ्यते कालिदाससाहित्ये। सम्बोधनार्थे महाकवी रघुवंशे बत शब्दस्य प्रयोगं कृतवान् । सुन्दरमुदाहरणमत्रैवोपस्थाप्यते।

**त्यजत मानमलं बत विग्रहैर्न पुनरेति गतं चतुरं वयः॥** रघु.9.47

किन्तु अभिज्ञानशाकुन्तले बत शब्दोऽनुकम्पां प्रकटयितुं प्रयुक्तः। तदेव निम्नोक्तादुदाहरणात् स्पष्टं यथा-

**क्व बत हरिणकानां जीवितञ्चातिलोलम्।**
**क्व च निशितनिपाता वज्रशाराः शरास्ते ....॥** अभि.शाकु.1.10

आश्चर्यप्रकटनाय अयं शब्दोऽपि प्रयुक्तः- यथा कुमारसम्भवे

**अहो बतासि स्पृहणीयवीर्यः॥** 3.20।।

**12. 'खलु' शब्दस्य प्रयोगः**

वयं जानीमः खलु अव्ययानि अनेकेषु अर्थेषु प्रयुज्यन्ते। यथा अनुनयः,



याचना, निश्चयः, हेत्वादयः। अनुनयार्थे खलु शब्दस्य प्रयोगो महाकविः–

**न खलु न खलु बाणः सन्निपात्योऽयमस्मिन् ...॥** अभि.शा.1.10।।

इति अभिज्ञानशाकुन्तले कृतवान्।

तथैव निश्चयार्थेऽपि अयं शब्दस्तेन प्रयुक्तः। यथा रघुवंशे-

**गृहाण शस्त्रं यदि सर्ग एष ते न खल्वनिर्जित्य रघुं कृती भवान्॥** 3.51।।

अस्मिन्नेवार्थेऽपरं मनोहरणमुदाहरणम्-

**अनुत्सेकः खलु विक्रमाऽलङ्कारः॥** विक्रमोर्वशीयम्

यथा अभिज्ञानशाकुन्तले-

**दूरीकृताः खलु गुणैरुद्यानलता वनलताभिः॥** 1.17।।

एतादृशानि अनेकानि रमणीयानि उदाहरणानि अस्माभिः प्राप्यन्ते किन्तु गौरवपरिहाराय तानि न प्रदीयन्ते।

हेत्वर्थे खलु शब्दस्य प्रयोगः-

**तदिदं गतमीदृशीं दशां न विदीर्ये कठिनाः खलु स्त्रियः..**

कुमारसम्भवम् 4.5।।

**13. ननु शब्दस्य प्रयोगः**

ननु निपातोऽपि काव्यसौन्दर्यं वर्धयति। अस्य निपातस्य प्रसिद्धानि उदाहरणानि अत्र दीयन्ते। यथा अवधारणार्थे ननु शब्दस्य प्रयोगः-

**ननु प्रवातेऽपि निष्कम्पा गिरयः॥** अभिज्ञानशाकुन्तलम्, 6

**ननु वज्रिण एव वीर्यमेतद् विजयन्ते द्विषतो यदस्य पक्ष्याः॥**

विक्रमोर्वशीयम्, 1.17

**विधुरां ज्वलनातिसर्जनान्ननु मां प्रापय पत्युरन्तिकम्॥**

कुमारसंभवम्, 4.32

कामदहनानन्तरं शोकाकुला रतिर्वसन्तं भर्तुः समीपं नेतुं पुनः-पुनः प्रार्थयति। अस्मिन्नेवासरे 'ननु' निपातेन रतेरसह्यविरहवेदना व्यज्यते।

**14. 'नाम' शब्दस्य प्रयोगः**

नामेति निपातः प्राचुर्येण प्रयुज्यते कविभिः। अस्यानेके अर्था विद्यन्ते। विवक्षानुसारमिदं पदं भिन्नार्थान् बोधयति। नामनिर्देशनाय-

**अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः॥**

कुमारसंभवम् 1.1।।

'वस्तुतः' अर्थेऽपि-

**विनीतवेषेण प्रवेष्टव्यानि तपोवनानि नाम..... ॥**

अभिज्ञानशाकुन्तलम्।

**अतनुषु विभवेषु ज्ञातयः सन्तु नाम॥** अभिज्ञानशाकुन्तलम् 5.8

प्रथमोदाहरणे नाम-पदेन व्यवहारौचित्यं सूच्यते। यदा दुष्यन्तः कण्वर्षेराश्रमं प्रविशति तदा आश्रमवास्यनुरूपं साधारणवेशं दधाति। अत्र 'नाम' शब्दो योग्यतां, औचित्यभावं च प्रकटयति। द्वितीये उदाहरणे राज्ञः प्रजारक्षणदायित्वं तथा च तस्य निर्वहणं व्यज्येते।

### 15. 'इति' शब्दस्य प्रयोगः

इति अव्ययस्य प्रयोगः सर्वाधिको भवति संस्कृतवाङ्मये। प्रायो मन्यते यद् 'इति' अव्ययम् 'अनेन प्रकारेण' 'इत्थम्' वा इति अर्थे भवति। अन्ये अर्था अपि अस्य अव्ययस्य सन्ति। कारणार्थे 'इति' शब्दस्य प्रयोगः –

**पुराणमित्येव न साधु सर्वम्॥** मालविकाग्निमित्रम् 1.2

पूर्वोक्तमिति अर्थे इति शब्दस्य प्रयोगः-

**ज्ञास्यति कियद् भुजो मे रक्षति मौर्वीकिणाङ्क इति॥**

अभिज्ञानशाकुन्तलम् 1.13

वक्ष्यमाणे अर्थे-

**समाभिधानो हरिरित्युवाच ..... ॥** रघुवंशम् 1.13।।

विषयकथनार्थे-

**शीघ्रमिति सुकरं निभृतमिति चिन्तनीयम्॥** अभिज्ञानशाकुन्तलम्, 3

### 16. 'अनु' शब्दस्य प्रयोगः

'अनु' अव्ययस्य प्रयोगः पञ्चसु अर्थेषु भवति। यथा पृष्ठतः, सह, हीने, लक्षणा तथा च इत्थम् । एतेषु अर्थेषु रघुवंशमहाकाव्ये 'अनु' अव्ययस्य प्रयोगः केवलम् इत्थमिति अर्थे कालिदासेन कृतः–

**क्रमेण सुप्तामनुसंविवेश सुप्तोत्थितां प्रातरनूदतिष्ठत्॥** रघु.2.24

### 17. 'अपि' शब्दस्य प्रयोगः

प्रश्नार्थे- अपि शब्दप्रयोगस्य निम्नोक्तानि उदाहरणानि विशेषरूपेण द्रष्टव्यानि।



**अपि सन्निहितोऽत्र कुलपतिः॥** अभिज्ञानशाकुन्तलम् ।1।

**अप्यग्रणीर्मन्त्रकृतामृषीणां कुशाग्रबुद्धे कुशली गुरुस्ते॥** रघु. 5.4

**अपि क्रियार्थं सुलभं समित्कुशम्॥** कुमारसंभवम् 5.32

सम्भावनार्थे–

**अपि नाम कुलपतेरियमसवर्णक्षेत्रसम्भवा स्यात्॥** अभि.शाकु. 1

समुच्चयार्थे–

**अस्ति मे सहोदरस्नेहोऽप्येतेषु॥** अभिज्ञानशाकुन्तलम् 1

भारार्थे-

**यूयमप्यनेन कर्मणा परिश्रान्ताः॥** अभिज्ञानशाकुन्तलम् 1

### 18. उपसंहारः

उपर्युक्तचर्चया स्पष्टं भवति यदव्ययस्य प्रयोगो निष्कारणं निष्प्रयोजनं केवलं पादपूरणार्थे कदापि न कृतो महाकविकालिदासेन। एतेषामव्ययानां समुचितप्रयोगाय संस्कृतव्याकरणज्ञानस्य महती आवश्यकता वर्तते। अव्ययानां संख्या बृहती अस्ति। सर्वाणि अव्ययानि अर्थसौष्ठवं न कुर्वन्ति। प्रयोगनैपुण्यान्न केवलमव्ययानामपि तु वाक्यस्य सौन्दर्यं, वैशिष्ट्यं च वर्धते।

एतेषामव्ययानां समुचितप्रयोगेण कालिदासभारती समृद्धा संस्कृता सौन्दर्यमण्डिता च सञ्जातास्ति। एतादृशमव्ययपदप्रयोगसौष्ठवं नान्यासु रचनासु दृश्यते। न केवलं काव्यसौन्दर्यमपि तु महाकविः कालिदासः एतेषां प्रयोगेण भाषायाः प्रचारमपि कृतवान्, तस्याः संरक्षणमपि कृतवान्। संस्कृतभाषाविकासकर्मणि महद् योगदानमपि कृतवान्। अतरात्मविश्वासेन साकं वयं कथयितुं शक्नुमो यत् कालिदाससाहित्यस्याध्ययनं न केवलं साहित्यिकं सौन्दर्यबोधं संवर्धयिष्यति अपि तु व्याकरणज्ञानं विशेषरूपेण सुन्दरशब्दविन्यासकौशलं प्रशिक्षयिष्यति यद् अद्यतनानां विद्यार्थिनां कृते महद् उपकारकमस्ति।

***

# पाणिनीयव्याकरणस्य प्रक्रियापद्धतिः

**डॉ० चन्द्रमाधवसिंहः**

व्याकरणशास्त्रमत्यन्तं प्राचीनम्। षट्सु वेदाङ्गेषु व्याकरणस्य प्राधान्यं स्वीकृतम्। यथोक्तं- 'मुखं व्याकरणं स्मृतम्।' व्याकरणं शिक्षा निरुक्तञ्च एतत्त्रयं व्याकरण-सम्बद्धम्। शिक्षानिरुक्तञ्च व्याकरणस्य पूरकमस्ति इति वक्तुं नास्ति काचित् अतिशयोक्तिः।

ब्राह्मणग्रन्थेषु प्रातिशाख्येषु च व्याकरणविषयकाः केचन विषयाः व्याख्याताः। व्याकरणस्य उदयकालेऽस्मिन् यास्कस्य अवदानमपि उल्लेखनीयं वर्तते। पण्डितः युधिष्ठिरमीमांसकः स्वकीये ''संस्कृत-व्याकरणशास्त्र का इतिहास'' नाम्नि ग्रन्थे पाणिनेः प्राचीनानां ८5 वैयाकरणानां सप्रमाणमुल्लेखं करोति किन्तु पाणिनिपूर्वव्याकरणग्रन्थानामनुपलब्धिकारणतः तेषाम् अध्ययनं दुष्करमेव। अष्टाध्यायीं दृष्ट्वा तथ्यमिदम् अवगन्तुं शक्यते यत् पाणिनिपूर्वं व्याकरणस्य सुदृढपीठिका विद्यमाना आसीत् । अष्टाध्याय्याम् उल्लिखितानाम् आपिशलिकाश्यपगार्ग्यगालव-चाक्रवर्मणभरद्वाजशाकटायनशाकल्यस्फोटायनाचार्याणां नामोल्लेखं विधाय पाणिनिः तान् सादरं स्मरति। अनेन तथ्येनापि ज्ञायते यत् पाणिनेः पूर्वं संस्कृतव्याकरणं विकसितमासीत्।

'एकेषाम्' 'सर्वेषाम्' 'प्राचाम्' 'उदीचाम्' इत्यादिपदानि प्रयुज्य पूर्ववर्त्तिनां वैयाकरणानां सामूहिकं मतं पाणिनिना यत्र-तत्र निर्दिष्टम्। पाणिनेः महत्ता एवम् आसीत् यत् तेन स्वस्मात् पूर्ववर्त्तिनां वैयाकरणानाम् आधमर्ण्यं स्वीकृतम्। पाणिनिव्याकरणेन स्ववैशिष्ट्यकारणात् तादृशं महत्त्वमधिगतं यत् साधारणजनानां दृष्टौ पाणिनीयव्याकरणमेव संस्कृतव्याकरणस्य**पर्यायवाचि पदं** जातम्। स्वकीय-वैशिष्ट्यकारणात् 'अष्टकम्' एकस्वरेण जगतः सर्वाधिकं प्रौढं प्रामाणिकञ्च व्याकरणपुस्तकं स्वीकृतम्। यद्यपि



पाणिनेः कृतेः पूर्णतां प्रापयितुं कात्यायनपतञ्जल्योः योगदानम् अविस्मरणीयमस्ति। परवर्त्तिकाले पाणिनीयव्याकरणं त्रिमुनिव्याकरणम् इति नाम्ना लोके प्रथितम्। तत्रापि **यथोत्तरं मुनीनां प्रामाण्यम्** इति वचनं सर्वैः सहर्षं समादृतम्।

महर्षेः पतञ्जलेः अनन्तरं पाणिनीयवैयाकरणानां द्विधा विभागः कर्तुं शक्यते- (1) यैः पाणिनेः अष्टाध्यायीम् उपजीव्यग्रन्थं मत्वा तत्सूत्रक्रमानुसारं व्याख्यानं कृतम् । (2) यैः अष्टाध्यायीम् उपजीव्यग्रन्थं मत्वापि शिक्षणसौविध्यदृष्ट्या प्रकरणेषु वर्गीकरणं प्रक्रियायाः धिया सूत्रक्रमे अपेक्षितं परिवर्तनं कृतम्। उक्तयोः अनयोः प्रथमा कोटिः अष्टाध्यायीपरम्परा द्वितीया च कोटिः प्रक्रियानुसारी परम्परा अभिहिता। अध्ययनेऽध्यापनेऽपि अष्टाध्यायीपद्धतिः प्रक्रियापद्धतिश्चागता। अद्यत्वे अष्टाध्यायीपद्धतेः अपेक्षया प्रक्रियापद्धतेः अध्ययनाध्यापनं प्रबलतरमवलोक्यते।

प्रस्तुतेऽस्मिन् आलेखे प्रक्रियानुसारिण्याः परम्परायाः विवेचनं कर्तुम् इष्यते- अष्टाध्याय्याः सूत्राणि प्रकरणक्रमेण व्यवस्थातुं धर्मकीर्तिना सर्वप्रथमो यत्नः कृतः। अस्य ग्रन्थस्य नाम 'रूपावतारः' अस्ति। ग्रन्थस्यास्य नाम्ना एव रूपसिद्धेः प्राधान्यं सूच्यते। द्वादशशतकस्य मध्यभागे धर्मकीर्तेः स्थितिः मता। रूपावतारः भागद्वये विभक्तः तदनुसारं अष्टसु अवतारेषु विभाजिते पूर्वार्द्धे सुबन्तं वर्णितम् उत्तरार्धे च तिङन्तं कृदन्तञ्च व्याख्यातम्। रूपावतारः पाणिनीयप्रक्रियापद्धतेः उपलभ्यः आदिमो ग्रन्थः, यस्मिन् वैदिकप्रक्रियां विहाय पाणिनीयसूत्राणि (2664) सङ्कलितानि सन्ति।

तदनन्तरं विमलसरस्वत्याः नामोल्लेखनीयं यस्य 'रूपमाला' नामको व्याकरणग्रन्थः प्रसिद्धः। रूपमालायाः कौमुदीग्रन्थानाञ्च शैल्यां समानता दृश्यते। अस्मिन् ग्रन्थे प्रत्याहारसंज्ञापरिभाषासन्धिसुबन्ततिङन्तस्त्रीप्रत्ययकारककृत्तद्धितसमासाश्च प्रकरणक्रमेण उपन्यस्ताः तदनु शब्दरूपाणि धातुरूपाणि च विशेषेण विवेचितानि।

रूपमालायाः अनन्तरं चतुर्दशशतकस्य अन्ते रामचन्द्राचार्येण 'प्रक्रियाकौमुदी' रचिता। ग्रन्थस्यास्य उद्देश्यं प्रक्रियाबोधनमस्ति। एतदतिरिच्य शेषकृष्णस्य 'प्रक्रियाकौमुदी' पूर्वार्द्धोत्तरार्धरूपेण द्विधा विभक्तः- पूर्वार्द्धे सुबन्तज्ञानाय संज्ञासन्धि-स्वादिस्त्रीप्रत्ययविभक्त्यर्थसमासतद्धितप्रकरणानि क्रमेण सङ्कलितानि। उत्तरार्द्धे तिङन्तविवरणमस्ति। वैदिकी प्रक्रिया अत्र परित्यक्ता। ग्रन्थेऽस्मिन् 2470 पाणिनीय-सूत्राणि सङ्कलितानि सन्ति। अयमेव सः ग्रन्थः अस्ति यतः प्रेरणां प्राप्य भट्टोजिदीक्षितेन सिद्धान्तकौमुदी रचिता। यद्यपि रूपावतारादपि अनेन प्रेरणा लब्धा तथापि रामचन्द्रस्य प्रक्रियाकौमुद्या एव अस्योपरि अधिकः प्रभावो दृश्यते।

भट्टोजिदीक्षितस्य ग्रन्थस्य नाम ''वैयाकरणसिद्धान्तकौमुदी'' अस्ति। ग्रन्थेऽस्मिन् अष्टाध्याय्याः सर्वाणि सूत्राणि समाकलितानि सन्ति। पूर्वार्द्धोत्तरार्धरूपेण विभक्तस्य ग्रन्थस्य पूर्वार्द्धे सुबन्तसिद्धौ उपयोगिप्रकरणानि समावेश्य तदन्तर्गते संज्ञापरिभाषा-सन्धिसुबन्ताव्ययस्त्रीप्रत्ययकारकसमासतद्धितप्रकरणानि निबद्धानि। उत्तरार्द्धे च तिङन्तण्यन्तादिप्रक्रियाकृदन्तप्रकरणस्वप्रकरणानि च उपनिबद्धानि। लौकिक-वैदिकोभयशब्दानां सिद्धिमन्वाख्याय प्रक्रियाशैली पूर्णताशिखरं यावत् दीक्षितः प्रापयत्। यद्यपि नारायणभट्टेन 'प्रक्रियासर्वस्वम्' इति लिखितं तथापि सिद्धान्तकौमुद्याः प्रचारः प्रसारश्च अधिको जातः, फलस्वरूपं सिद्धान्तकौमुद्याः संक्षिप्तं रूपद्वयं वरदराजेन कृतं ययोः नाम अस्ति- मध्यसिद्धान्तकौमुदी लघुसिद्धान्तकौमुदी च। सिद्धान्तकौमुदी तथा प्रथिता यद् अस्या उपरि नैकाः टीकाः रचिताः,यासु टीकासु वासुदेवदीक्षित-रचितबालमनोरमा तथा ज्ञानेन्द्रसरस्वतीरचिततत्त्वबोधिनीटीका प्रसिद्धा।

प्राचीनकाले अध्ययनाध्यापनयोः स्वीकृता पद्धतिः अष्टाध्यायीपद्धतिरेव आसीत्। अतः काशिकामहाभाष्यादिग्रन्थेषु तस्याः पद्धतेः एव आश्रयणं कृतम्। अष्टाध्याय्यां सूत्राणि निर्धारितक्रमेण एव पठितानि सन्ति। तेन क्रमेण सूत्रार्थस्य सम्यक् अवगतिः भवति। सूत्रार्थमवगन्तुं पाणिनिना प्रयुक्तानामनुवृत्त्यधिकारादीनां प्रयोगिकसङ्केतानां ज्ञानम् अष्टाध्यायीक्रमेण एव भवितुमर्हति। किन्तु प्रयोगसिद्धौ तादृशं सौविध्यं नानुभूयते यथा प्रक्रियापद्धतौ। एकेन उदाहरणेन तथ्यमिदमवगन्तुं शक्यते। अष्टाध्याय्याः प्रथमेऽध्याये संज्ञाः उक्ताः, प्रथमाध्यायस्य प्रथमपादस्य आदिमं सूत्रं 'वृद्धिरादैच्' इति पठितम्। अनेन सूत्रेण वृद्धिसंज्ञायाः व्याख्यानं कृतम्। ''या या संज्ञा सा सा प्रयोजनवती'' इति वचनेन वृद्धिसंज्ञायाः प्रयोजनं 'वृद्धिरेचि' इत्यस्मिन् सूत्रे दृश्यते किन्तु 'वृद्धिरेचि' इति सूत्रं षष्ठाध्याये पठितम्। उभयोः सूत्रयोः अन्तरालं दृष्ट्वा 'देवैश्वर्यम्' इत्यत्र महान्तं क्लेशम् अनुभवितुं शक्यते। यावत् 'वृद्धिरेचि' सूत्रं पठ्यते तावत् वृद्धिरादैच् सूत्रेण सह एकवाक्यतां स्थापयितुं विस्मर्तुं शक्यते। अयमेव क्लेशः प्रक्रियानुसारिवैयाकरणैः अनुभूतः अतः प्रयोगसौकर्यनिमित्तं पाणिनीयसूत्रक्रमम् उल्लङ्घ्य भिन्नः क्रमः निर्धारितः यः क्रमः प्रक्रियाक्रमः प्रक्रियापद्धतिः वा अधुना ज्ञायते। एकया दृष्ट्या कौमुदीकारैः पाणिनीयव्याकरणस्य उपकार एव कृतः।

अधुना 'रामः' इति पदस्य साधुत्वप्रक्रियां प्रदर्श्य प्रयोगसाधुत्वसौकर्यं प्रक्रियापद्धतिवैशिष्ट्यञ्च प्रतिपादयितुं शक्यते– रामस्य प्रातिपदिकत्वविधायकं सूत्रं 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' इति प्रथमाध्याये पठितम्। प्रातिपदिकात्



सुप्रत्ययविधायकसूत्रं चतुर्थाध्याये पठितम्। प्रत्ययस्य परत्वविधायकसूत्रं तृतीयाध्याये पठितम्। अच्लोपविधायकसूत्रं प्रथमाध्याये, रुत्वविधायकसूत्रम् अष्टमाध्याये, अवसानविधायकसूत्रं प्रथमाध्याये तथा विसर्जनीयविधायकसूत्रम् अष्टमाध्याये पठितम्।

केवलं रामः इति प्रथमान्तं पदं साधयितुम् अष्टाध्याय्याः प्रथमतृतीय-चतुर्थाष्टमाध्यायाः पठ्यन्ते चेत् साधुत्वं ज्ञायते किन्तु प्रक्रियानुसारिरचितपाणिनीय-व्याकरणाध्ययनेन रामः इति पदं साधयितुं विभिन्नेषु अध्यायेषु पठितानि सूत्राणि एकत्र अजन्तपुल्लिङ्गप्रकरणे उल्लिखितानि। अतः पाठकैः तदर्थं विशेषः आयासः न क्रियते। अतः अल्पप्रयासेन साध्यां साधुत्वप्रक्रियां सम्यग्विज्ञाय प्रक्रियाक्रमे सहजानुरक्तिः अवलोक्यते।

प्रक्रियाक्रमानुसारिग्रन्थानाम् इदम् एकं वैशिष्टयं यत् कश्चन पाठकः यावदंशम् अधीते तावतां विषयाणां ज्ञानं भवति। परिणामतः लाघवप्रियाः अल्पमतयश्च पाठकाः अष्टाध्यायीं विहाय प्रक्रियाग्रन्थानाम् अध्ययनं कर्तुम् आरभन्त। प्रक्रियापाठकैः इदमनुभूतं यत् अष्टाध्यायीपद्धतिः कठिना अग्राह्या च वर्तते। प्रक्रियानुसारिप्रकरणरचना-भावात् यावत् सम्पूर्णा अष्टाध्यायी न पठ्यते तावत् एकस्य विषयस्यापि ज्ञानं न भवति। तावत् केवलं एकः समासविषयः अपि ज्ञातुं न शक्यते यतो हि समाससम्बद्धानि समस्तानि कार्याणि प्रथमद्वितीयपञ्चमषष्ठाध्यायेषु अनेकत्र विकीर्णानि सन्ति।

एवं प्रकारेण सम्यक् विचार्थ मया अनुभूयते यत् अल्पप्रयासेन व्याकरणं ज्ञायते चेत् प्रक्रियापद्धतिम् आश्रित्य झटिति प्रयोगसौकर्यं विधाय स्वस्य मनोगतं सफलीकर्तुं शक्यते।

***

# विवेकानन्दविजयं स्वामी विवेकानन्दश्च

**डा० पूर्णचन्द्र उपाध्याय**

महामोहान्धकाराच्छादितेऽस्मिन् त्रिविधसन्तापसंवलिते संसारे प्रतियुगं सदसद्विचारकर्तॄणां विवेकवतां धर्मोद्धारकाणां महापुरुषाणां कालजयिनां जगद्धिताय धरावतरणं बोभूयते इत्यत्र नास्ति कश्चित्सन्देहलेशावसरः। यतो हि ''**मोक्षार्थमात्मनः जन्म हिताय जगतस्तथा**''[1] इति विवेकानन्दस्यैवोक्तिं सार्थकीकुर्वन् ''**यदा यदा हि धर्मस्य... तदात्मानं सृजाम्यहम्**''[2] इत्यादिकं योगेश्वरश्रीकृष्णस्य वचश्चानुकुर्वन् स्वयं परमात्मा एव अवतारवतां महापुरुषाणां जनिग्रहणमाध्यमेन अवतारत्वमवलम्ब्य कर्मयोगेन ज्ञानयोगेन च दुष्टविदलनशिष्टपरिपालनात्मकं महदुद्देश्यं साधयति इति तत्तद्बुधानामैकमत्यम्। तदेवं प्रत्येकं युगावच्छिन्नं तत्तत्समसामयिक-सामाजोपयोगित्वं राष्ट्रानुकूलधर्मसापेक्षत्वं चानुकृत्य धरायामस्यां भारतभुवि स्वकीयजन्मना धरामिमाम् उद्धर्तुकामेषु महापुरुषेष्वन्यतमः नरेन्द्राभिधान-पूर्वः स्वामी विवेकानन्दः विविदिषानन्दापरनामधेयः इति तथ्यं सकलविद्वज्जनमानसगम्यमेव।

तमिमं युगजन्मानं कालजयिनं विश्वनेतारं दिव्यात्मानं महापुरुषं विषयीकृत्य नैकया भाषया नानाविधं साहित्यजातं विरचितं, विरच्यते च तद्गुणसमुपासकैः सुधीभिरिति निश्चितिः। तदेतस्यां शृङ्खलायां डॉ. श्रीधरभास्करवर्णेकरमहोदयानाम् अवदानमपि वरीवर्त्ति। तदनेन विद्वत्कविवरेण ''विवेकानन्दविजयमि''ति महानाटकं विरच्य महानायकस्य स्वामिनः विवेकानन्दस्योदात्तं चरितं सकललोचनगोचरीकर्तुं प्रयतितम्। तदिदं विवेकानन्दविजयमिति नाटकं ''**नाटकं ख्यातवृत्तं स्यात्**''[3] इति लक्षणानुसारं श्रीविवेकानन्दस्य विश्वविश्रुतं चरितमधिकृत्य वर्त्तते किमप्यनुपमम्। दशभिरङ्कैश्च निबद्धं सदिदं वीराख्येनाङ्गिरसेन संसिक्तम्, नायकश्चास्य धीरोदात्तकोटिकः इत्येवं नाटकगतलक्षणमत्र सुष्ठु संगच्छते इति सार्थकत्वमस्य। अपि चेदं चतुर्भिः पताकास्थानकैर्युतं सद् दशभिरङ्कैः गुम्फितमिति कृत्वा महानाटकस्य लक्षणमपि



अधिकरोति। उक्तं चात्र विश्वनाथेन–

**एतदेव यदा सर्वैः पताकास्थानकैर्युतम्।**
**अङ्कैश्च दशभिर्धीरा महानाटकमूचिरे॥**[4]

कस्यचिदपि काव्यस्य नामकरणे आधारत्रिकमङ्गीक्रियते। घटनाविशेषमवलम्ब्य नामकरणं विधीयते अथवा नायकनायिकयोः कस्यचिदेकस्य नाम्ना उत तद्रचयितुर्नाम्ना। तदिदं नाटकन्तु नायकप्रधानं घटनाविशेषप्रधानं चोभयथा संगच्छते। नाटकस्यास्य प्रमुखं पात्रं नायकः विवेकानन्द एव। अपि च अमेरिकायां शिकागोसर्वधर्म सम्मेलनकार्यक्रमे विवेकानन्दस्य धर्मस्वरूपव्याख्यानविजयेन विवेकानन्दविजयमिति नामकरणं घटनाप्रधानत्वं द्योतयतीति नाटकस्यास्य अपूर्वं वैशिष्ट्यम्। तदिदं तथ्यं प्रमाणीक्रियते नाटकेऽस्मिन् प्रतिपादितलोकमान्यबालगंगाधरतिलकस्योक्तेर्यथा ''मन्ये नवोज्ज्वलस्वरूपेण पुनराविर्भूत इव सनातनो हिन्दुधर्मः श्रीविवेकानन्दस्वामिनाम् अनेन दिग्विजयिना व्याख्यानेन। (विचिन्त्य) भगवता बुद्धेन अहिंसाधर्मस्य इव वेदान्तधर्मस्य चक्रं प्रवर्त्तितं स्वामिना विवेकानन्देन। (प्राञ्जलिः भूत्वा) जगद्गुरुः श्रीशंकराचार्य इव धर्मविजयी खलु अयं स्वामी विवेकानन्दः।''[5]

''**वस्तु नेता रसस्तेषां भेदकाः**''[6] इति न्यायेन नाटकीयतत्त्वेषु वस्तुनेतृ-रसानां लब्धसत्ताकत्वात् तेष्वाद्यतमस्य वस्तुनः परिशीलनमादौ करणीयमिति धिया तदेव विवेच्यते। नाटकस्यास्य प्रमुखं यदितिवृत्तं कथानकं वा तत्तु महानायकश्रीविवेकानन्दस्य चरित्रचित्रणमेव काव्यकर्तुः लक्ष्यम्। यत्र पुनः प्रमुखपात्रविषयकं यद्भाषणादि तत्तु प्रायेण नामूलमिति इतिहासविदः सम्यग्रूपेण जानीयुः। परन्तु तत्र ''**प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्त्तते**'' इति न्यायेन नाटकेऽस्मिन् यानि कानि कल्पितपात्राणि तदाचरितानि च चित्रितानि, तत्रास्ति किमपि विशिष्टं प्रयोजनम्। मुख्यं प्रयोजनन्त्वत्र नायकसमकालीनायाः वस्तुस्थितेः सामाजिकदशायाः वा प्रतिपादनम् इति। नाटकस्यास्य ऊर्जस्वलनायकस्य धरावतरणकाले तदानीन्तनसमाजे व्याप्तविसङ्गतीनामाविष्करणं कल्पितपात्राणां प्रतीकैरेव कर्तुं प्रयतितं लेखकेन।

नाटकस्यारम्भे भोजनपराणि आडम्बरप्रधानानि धर्मव्रतानि इति निवेदयन्त्याः नट्याः माध्यमेन सामान्यजनतायाः धर्माडम्बरता[7] प्रतिपादिता नाट्यकारेण। प्रथमेऽङ्के यथा चित्रितं, तदनुसारम् उन्मुक्तमार्गे एव कामुकायमानानां महाविद्यालयीयछात्राणा-मुच्छृङ्खलमाचरणं तदानीं सद्यःप्रचलितस्य पाश्चात्त्यशिक्षणविधेः प्रभावेण विकृतिमापद्य-

मानस्य युववर्गस्य प्रतीकम्। सप्ततिवर्षीयवृद्धस्य पतित्वमाप्तस्य दिवङ्गत्या बालवैधव्यमुपगता शेफालिका नामधेया स्त्रीः अज्ञानदारिद्र्यदैन्यग्रस्तस्य तदानीन्तन-भारतीयसमाजस्य प्रतीकम्। द्वितीयेऽङ्के कल्पितमात्रत्वेन चित्रितो होलिकाचार्यः लोकप्रतारकाणां सज्जनायमानानां प्रतीकम्। तदाश्रमगतमुदन्तन्तु विकृतिमधिगतस्य भक्तिमार्गस्य प्रतीकम्, पञ्चमेऽङ्के प्रतिपादितः पुरोहितः धार्मिकम्मन्यस्याहङ्कारिणः, मौलवीसत्प्रवृत्तयवनस्य, दुर्बलतरुणाश्च हिन्दुसमाजस्य प्रतीकानि, षष्ठेऽङ्के चित्रिताः नृत्यन्तः शिशवः अमेरिकाराष्ट्रस्य बालत्वं द्योतयन्ति। दशमेऽङ्के विवेकानन्दस्य धर्मविजयेन प्रह्लादितो लोकमान्यः तिलकः प्रमुदितस्य भारतराष्ट्रस्य प्रतीकभूतः। तदेवं वस्तुप्रतिपादनदृष्ट्या समसामयिकघटनाप्रधानात्मकं नाटकमित्यस्य वैशिष्ट्यमपरम्।

कस्यचिदपि कृतिरत्नस्य महत्त्वं वैशिष्ट्यं वा तद्गतप्रमुखपात्रस्य नेतृचरित्रस्य विश्लेषणादेव सम्यक् प्रतीयते इति धिया नाटकस्यास्य प्रमुखविषयीभूतस्य कथावस्तु-केन्द्रीभूतस्य धीरोदात्तनायकस्य परमयोगिनः विवेकानन्दस्य चरितगतं गुणजातं समीक्ष्यतेऽस्माभिः। नाटकस्यास्य प्रतिपाद्यानुसारं स्वामी विवेकानन्दः आबाल्यादेव आसीदेकाधारेण शारीरिकसंरचनात्मकदृष्ट्या अपराजेयः बलिष्ठः, दृढमनोबलेन अतुलनीयः पराक्रमी निर्भीकश्च, विविधघटनासम्मुखीकरणेन अप्रतिमः साहसी, अविरतभाषणकौशलेन प्रखरवक्ता, आवैदिकदर्शनादिसम्यग्ज्ञानेन अभूतपूर्वः मेधावी, नम्रत्वेन विनीतः, भक्त्या असाधारणगुरुभक्तः शिष्यवत्सलश्च। चैतन्येन अद्वितीयः दिव्यचैतन्यसम्पन्नः, परोपकारी, निर्बलेषु असहायेषु च दयावान्, असामान्यसमाज-संस्कारकः, सनातनसंस्कृतेः क्रान्तदर्शी विद्वान् प्रचारकश्च, समत्वदर्शित्वेन समन्वयवादी, राष्ट्रभक्तः, धर्मनिरपेक्षी, सततकर्मयोगी, सत्यान्वेषकश्चेत्येवं प्रकारकः, कालजयी, नवयुगनिर्माता चेति तच्चरितगतमपरिगणनीयं वैशिष्ट्यम्।

तद्धि तच्चरित्रवैशिष्ट्यख्यापकानि नाटकेऽस्मिन् प्रतिपादितानि कानिचन संवादात्मकवाक्यानि, यथा–

**कश्चित् छात्रः – नरेन्द्रेण समो वक्ता**
**सर्वे – न भूतो न भविष्यति।**
**द्वितीयः – नरेन्द्रेण समो ज्ञाता**
**सर्वे – न भूतो न भविष्यति।**
**तृतीयः – नरेन्द्रेण समो नेता**
**सर्वे – न भूतो न भविष्यति।**



**चतुर्थः - नरेन्द्रेण समो भ्राता**
**सर्वे – न भूतो न भविष्यति।**[८]

नाटकस्यास्य प्रथमेऽङ्के एव बाल्यविधवायाः शेफालिकायाः चरित्ररक्षणप्रसङ्गे विवेकानन्दस्य चरितगतमपूर्वं साहसिकत्वं, पराक्रमित्वं, परोपकारित्वं, नारी-सम्मानकरणत्वं च नैके विशिष्टाः गुणाः द्योतन्ते। तदत्र कामुकौ दुष्टौ प्रति नरेन्द्रस्य संवादोक्तिर्यथा– ''ननु मूढौ महाविद्यालयच्छात्रौ भूत्वाऽपि किं न जानीथः ''**मातृतुल्या पराङ्गना**'' इति। अपि च ''मातः, समाजेन तिरस्कृताऽपि मया नरेन्द्रेण मातृत्वेन अङ्गीकृताऽसि।''[९] इति।

विवेकानन्दः असाधारणसमाजसंस्कारकः समन्वयवादी चासीदिति तथ्यं नाट्यप्रतिपादिततदीयचरितविश्लेषणात् सुष्ठु ज्ञायते। तथाहि द्वितीयेऽङ्के यदा होलिकाचार्यस्य तथाकथितधर्मभीरोः जन्मदिवसोत्सवावसरे तदीयमाश्रमं प्रविष्टम् अन्धम् अस्पृश्यं ताड़नेन पङ्गुभूतं व्रणितं च नरेन्द्रः स्ववस्त्रखण्डैः तदीयं व्रणमुपचरति तत्पादं च संवाहयति, तदाऽन्धस्यास्पृश्यनिवारणपरकं वचः आकर्ण्य ''कथं दुःखार्तस्य स्पर्शेन दूषितो भवामि?'' अपि च ''**दुःखार्ता भ्रातरः सर्वे**'' इति पितृदेवेन बाल्यादेव शिक्षितोऽस्मि। तत्कथं भ्रातृभूतस्य एव स्पर्शेन दूषितो भवेयम् ? इति नरेन्द्रः तं प्रति वक्ति।[१०]

अस्पृश्यतासामाजिककलङ्कः, नरेन्द्रस्य चेतः नितरां दोदूयते स्म। अतोऽसौ स्वगतं ब्रूते ''हा हन्त। कोऽयम् अन्यायः? कोऽयं सामाजिकश्चिरकलङ्कः, कथमिदं पातकं विलयं नीयते[११] इति।

आसीदसौ नरेन्द्राभिधानपूर्वः विवेकानन्दः अस्पृश्यतायाः प्रबलविरोधीति अन्य एको दृष्टान्तः यथा, 'मार्गे कस्यचिन्मलबाहस्य हस्तात् चिलिमम् आदाय धूमपानं कुर्वन् नरेन्द्र उद्घोषयति यत्–

**सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि।**
**ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः॥**
**विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि।**
**शुनि चैव श्वपाके च पण्डिताः समदर्शिनः॥**[१२]

आसीदसौ विवेकानन्दः धर्मनिरपेक्ष इति तच्चरितात् ज्ञायते। यदा एकः मौलवी स्वस्य कृते ''**म्लेच्छ**'' इति शब्दं प्रयुक्ते तदा विवेकानन्दः तस्मै कथयति–

''किमर्थम् उच्यते म्लेच्छस्य इति? अयं म्लेच्छ शब्द एव मह्यं न रोचते। यतः प्रभृति अयं ''म्लेच्छः'' शब्दो भारते प्रसृतः तत आरभ्य भारतस्य विकासक्रमो निरुद्ध इव।।[13] इति।

विवेकानन्दस्य गुरुभक्तिरनन्या एव। स्वकीयं गुरुं रामकृष्णपरमहंसमसौ साक्षात् परमात्मनः अंशभूतं मनुते। स्वतश्चास्य मुखान्निस्सरति यथा– 'अहो सद्गुरोर्मे तपोमयं जीवनम्। नूनं साक्षाद् जगन्नाथ एव तपःसंचयार्थं श्रीरामकृष्णस्वरूपेण भुवम् अवतीर्णः। तथाहि–

**धर्मत्राणप्रखलहननप्राप्तकर्मातिरेकाद् ,**
**याता यस्य क्षयमिव तपः संचिता पूर्वशक्तिः।**
**सोऽयं साक्षाद् दृढनवतपः संचयं कर्तुकामः,**
**त्वद्रूपेण स्वयमुपगतः श्रीजगन्नाथ एव॥**[14]

अपि च महाज्वरप्रपीड़ितस्य विवेकानन्दस्य ''वयस्य, सत्यमेव यन्नास्ति खलु गुरुकृपासदृशं रसायनम्।।''[15] इति उक्तिरपि तद्गुरुभक्तिं प्रदर्शयति। विवेकानन्दः आसीदद्वैतवादी ब्रह्मतत्त्वदर्शीति तथ्यं स्पष्टं प्रमाणीक्रियते नाटकेऽस्मिन् तत्त्वस्यास्य नैकत्र चरितानुगुण्येन प्रतिपादनात्। चतुर्थाऽङ्कगतिप्रतिपाद्यानुसारं यदा रामकृष्णपरमहंसः नरेन्द्रस्य नारायणसंज्ञकत्वं दिशति, तदा नरेन्द्राभिधानो विवेकानन्दो ब्रूते– **''नरेन्द्रो वा नारायणो वा भवतु यः कोऽपि देहस्य अस्य व्यपदेशः। अहन्तु नामातीतो रूपातीतश्च।''**[16] इति।

षष्ठाङ्कगतप्रतिपाद्यानुसारं राजस्थानीयमहाराजस्य मानसिंहस्य राजप्रासादे नर्त्तक्याः कस्याश्चिद् गायिकायाः भक्तिसंगीतं श्रुत्वा संन्यासी नरेन्द्रः तत्संगीतकक्षं प्रविश्य ब्रूते– **सर्वं खल्विदं ब्रह्म। इयं नर्तकी अपि ब्रह्म एव तत्त्वतः।**[17] इति। तत्र नवमाङ्कस्य प्रतिपाद्यानुसारम् अमेरिकायां शिकागोसर्वधर्मसम्मेलनावसरे तदीयमुद्बोधनं ''तत्त्वात्मकं व्याख्यानं'' तु अद्वैतवादित्वमस्य स्पष्टमावेदयति।[18]

सोऽसौ नरेन्द्रः संन्यासिवेशेन ''**विविदिषानन्दः**'' इति नामान्तरोपाधिमाधत्ते जगत्कल्याणाय इति तदीयस्वकीयवचनात् ज्ञायते। तद्धि– ''अयमेव स विविदिषानन्दः। परिचितजनसम्पर्कं परिहर्तुं मया नामान्तरं कृतमस्ति। ... लब्धोऽस्ति मया भाविकर्त्तव्यविषयक ईश्वरीय आदेशोः यन् ''मोक्षार्थमात्मनः जन्म हिताय जगतस्तथा।''[19] इति।

''विवेकानन्द'' इत्युपाधिभूतं नाम तु राज्ञा मानसिंहेन स्वामिनो नरेन्द्रस्य



तत्त्वज्ञानेन प्रभावितेन तेन विभूषणीकृतम्। स्वामिनो विवेकानन्दस्य अपूर्वा राष्ट्रभक्तिः स्वतः प्रमाणीभूयते सप्तमेऽङ्के प्रतिपादितैः तदीयैः शिखरिणीच्छन्दोबद्धैः ४३ मितैः हृदयोद्गारकैः स्तोत्रात्मकैः पद्यैः।

तदेवं कालजयिनः युगजन्मनः महापुरुषस्य राष्ट्रियनायकस्यास्य स्वामिनः विवेकानन्दस्य सनातनधर्मपुनर्व्यवस्थापकस्य धर्मविजयात्मकचरित्रचित्रणेन ''विवेकानन्दविजयम्'' इति महानाटकं सर्वथा सार्थकनाम विश्वमानवसमाजस्य त्रैकालिकादर्शभूतं चेति दिक्।

***

## सन्दर्भाः


1. विवेकानन्दविजयम् (विवे.वि) = पञ्चमोऽङ्कः
2. श्रीमद्भगवद्गीता, 4/7
3. सा.द., 6/7-11
4. सा.द., 6/223
5. विवे.वि = दशमोऽङ्कः
6. द.रू., 1/4
7. सूत्रधारः, ''एवंविधं हि धर्मभोजनभाजनधर्मः'' इति वदन्ति, (विवे.वि = प्रस्ता.)
8. विवे.वि., 1/16-17
9. विवे.वि., प्रथमोऽङ्कः
10. विवे.वि., द्वितीयोऽङ्कः
11. विवे.वि., द्वितीयोऽङ्कः
12. विवे.वि., पञ्चमोऽङ्कः
13. विवे.वि., पञ्चमोऽङ्कः
14. विवे.वि., पञ्चमोऽङ्कः
15. विवे.वि., पञ्चमोऽङ्कः
16. विवे.वि., चतुर्थोऽङ्कः
17. विवे.वि., षष्ठोऽङ्कः
18. विवे.वि., नवमोऽङ्कः
19. विवे.वि., पञ्चमोऽङ्कः


***

# पातञ्जलमहाभाष्ये प्रयुक्तानां केषाञ्चिद् अनेकार्थिशब्दानां विवेचनम्

**प्रतिभा आर्या**

समग्रस्यापि वैदिकलौकिकसंस्कृतवाङ्मयस्य पूर्णरूपेण अधिगमनाय पाणिनीयाष्टाध्यायी एव लघुतमं साधकमिति सर्वैरपि अङ्गीक्रियते। यथा लोके तथा व्याकरणे[1] इति आभाणकं चरितार्थीकुर्वन् महर्षिपतञ्जलिः पाणिनीयसूत्राणां सम्पूर्णं महाभाष्यं प्रणिनाय। व्याकरणशास्त्रे लोकप्रयोगाणां मूर्धाभिषिक्तं स्थानं भवति, शब्दानां साधुत्वासाधुत्वनिर्णये लोक एव प्रमाणं भवति। अत एव भाष्यकारमते व्याकरणशास्त्रस्य कोऽपि सिद्धान्तः नियमो वा तावत् न मान्यो भवति यावत् लोकव्यवहारेण तस्य पुष्टिः न भवेत्। महाभाष्ये भाष्यकारस्य एषा शैली बहुधा दृश्यते यत् शास्त्रीयसमस्यानाम् अनेकशः शास्त्रीयसमाधाने दत्तेऽपि अपरितुष्टेन[2] सता लोकव्यवहारेण तस्य परिपुष्टिः क्रियते **द्विर्बद्धं सुबद्धं भवति** इति[3] न्यायानुसरणेन।

अतएव लोकबलात् हि भाष्यकारेण **इष्टमेवैतत् संगृहीतं भवति**[4] इत्युक्त्वा अनेकानिष्टप्रयोगाणां निवारणम् इष्टप्रयोगाणाञ्च संग्रहणं कृतम्। अस्मिन्नेव क्रमे भाष्यकारस्य एषाऽपि शैली लक्ष्यते यत् अनेकार्थिशब्दानां विवेचनप्रसङ्गे एकस्य शब्दस्य अनेकशः अर्थसम्भवे तत्र प्रसङ्गरीत्या लौकिकोदाहरणेन परिपुष्टिं विधाय समाधीयते यत् कस्मिन् प्रसङ्गे कस्य शब्दस्य कोऽर्थः युक्तियुक्तो भविष्यतीति। सम्पूर्णे महाभाष्ये ग्रन्थकारेण द्वादश अनकार्थिशब्दानां विवेचनं कृतम्। तेषु केषाञ्चित् शब्दानां वर्णनमत्र प्रस्तूयते–

**ग्रामः–** हलोऽनन्तराः संयोगः[5] इति सूत्रभाष्ये भाष्यकारः कथयति यत् सर्वत्रैव हि अतज्जातीयकं व्यवधायकं भवति। कथम्– अनन्तराविमौ ग्रामौ। एषः प्रयोगः कथं सञ्जातः? तर्हि उत्तरयति ग्रामशब्दोऽयं बह्वर्थः। अस्त्येव शालासमुदाये



वर्त्तते। तद्यथा– ग्रामो दग्ध इति। अस्ति वाटपपरिक्षेपे वर्त्तते। तद्यथा– ग्रामं प्रविष्ट इति। अस्ति मनुष्येषु वर्त्तते। तद्यथा– ग्रामो गतः, ग्राम आगत इति। अस्ति सारण्यके ससीमके सस्थण्डिलके वर्त्तते। तद्यथा– ग्रामो लब्ध इति। तद् यः सारण्ये ससीमके सस्थण्डिलके वर्त्तते तमभिसमीक्ष्यैतत् प्रयुज्यते अनन्तराविमौ ग्रामाविति।

सर्वत्रैव हि अतज्जातीयकं व्यवधायकं भवति। अत्र यः चतुर्थः अर्थः वर्त्तते सारण्यके ससीमके तमभिसमीक्ष्य अनन्तराविमौ ग्रामौ एव प्रयोगः सिध्यति। यतो हि अस्मिन् अर्थे ग्रामनदीपर्वतादिकारणेन न भवति भिन्नजातीयः। अत एव वक्तुं प्रभवामः यत् सर्वत्र भिन्नजातीय एव व्यवधायको भवति, न तु तुल्यजातीयः। अत एव सूत्रेऽस्मिन् शास्त्रीयसंयोगसंज्ञायामपि भिन्नजातीय अचामेव व्यवधानत्वात् सूत्रस्थोऽनन्तरपदग्रहणद्वारा संयोगसंज्ञायाः स्वत एव निषेधो भविष्यति, हलां न भविष्यति। भाष्यकारेण अत्र अनेकार्थिशब्दानां विवेचनं लौकिकोदाहरणेन स्पष्टीकृतम्। यतोहि भाष्यकारस्य लौकिकोदोहरणरूपकम् अस्त्रबलं बहुधा दृश्यते यत्– रूपनिर्ग्रहश्च नान्तरेण लौकिकं प्रयोगम्।[6] शब्दं प्रयुयुक्षमाणेन लोकस्यानुसरणात्।... तच्च सामर्थ्यं लौकिकप्रयोगादवधार्यम्।[7]

ग्रामशब्दस्य बह्वर्थः आद्यन्तवदेकस्मिन्[8] सूत्रेऽपि प्रतिपादितः। तत्रापि लौकिकोदाहरणमाध्यमेन तद्यथा– अन्तरेणैव वचनं लोकविज्ञानात् सिद्धमेतत्। तद्यथा– लोके 'शालासमुदायो ग्रामः' इत्युच्यते। भवति चैतदेकस्मिन्नपि ''एकशालो ग्रामः'' इति। तदा उत्तरयति-विषम उपन्यासः। ग्रामशब्दोऽयं बह्वर्थः। चतुर्णामपि अर्थानां वर्णनं लोकोदाहरणेन स्पष्टीकृतम्– तद्यः सारण्यके ससीमके सस्थण्डिलके वर्त्तते तमभिसमीक्ष्यैतत्प्रयुज्यते– ''एकशालो ग्रामः'' इति।

भाष्यकारेण सम्पूर्णेऽपि महाभाष्ये सूत्रद्वये ग्रामशब्दस्य बह्वर्थता प्रतिपादिता। तत्रापि उभयत्र ग्रामशब्दस्य यः चतुर्थः अर्थः वर्त्तते तस्यैव ग्रहणं कृतम्। ग्रामशब्दस्य ये अन्ये अर्थाः सन्ति तेषां प्रयोगः न दृग्गोचरीभवति अत्र। संस्कृतवाङ्मये यदि पश्यामश्चेत् ग्रामशब्दस्य अन्येऽपि अर्थाः वर्त्तते (गांव इति) तस्य वर्णनं हितोपदेशे यथा–

**त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत्।**
**ग्रामं जनपदस्यार्थे स्वात्मार्थे पृथिवीं त्यजेत्॥**[9]

रघुवंशमहाकाव्ये[10] ग्रामेष्वात्मविसृष्टेषु इत्यत्र यः ग्रामशब्दः वर्त्तते सः प्रसिद्धग्रामशब्दः यत्र जनाः निवसन्ति इत्यस्मिन् अर्थे प्रयुक्तः। ग्रामशब्दस्य अपरः अर्थः समुच्चय (समुदाय) इति भवति। भगवद्गीतायां–भूतग्रामः स एवायं भूत्वा

भूत्वा, प्रलीयते[11] तथा च–भूतग्राममिमं कृत्स्नमवशम्।[12] पद्येस्मिन् भूतग्रामस्यार्थः– भूतसमुदायः इति। मनुस्मृतौ अपि[13] बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति। इति। श्लोके इन्द्रियग्रामस्यार्थः इन्द्रियाणां समूहः इति वर्त्तते। भर्तृहरिशतके[14] गुरुतरगुणग्रामाम्भोजस्फुटोज्ज्वलचन्द्रिका इत्यत्र गुणग्रामः अर्थात् गुणसमूहः इत्यर्थः। संगीतशास्त्रेऽपि ग्रामशब्दस्य प्रयोगः स्वराणां समूहः इत्यर्थे क्रियते।

## गुणशब्दः

तस्य भावस्त्वतलौ[15] इति सूत्रभाष्ये गुणशब्दस्य अनेकार्थवर्णनप्रसङ्गे भाष्यकारः लौकिकोदाहरणानि प्रस्तौति येन ज्ञायते यत् शब्दानामर्थज्ञाने लोकव्यवहारः कियान् उपयोगी वर्त्तते। यावत् लोकेषु प्रचलितानां शब्दानामर्थज्ञानं न भवति तावत् केवलं शास्त्रप्रोक्तशब्दार्थज्ञानेन न कोऽपि लाभः भवितुमर्हति। अतः शब्दार्थज्ञानाय लोकव्यवहारः बहूपयोगी वर्त्तते। वाक्यपदीयेऽपि भर्तृहरिणा प्राह[16]–

**प्रयुक्तानां हि शब्दानां शास्त्रेणानुगमः सताम्।**
**शब्दप्रमाणको लोकः स शास्त्रेणानुगम्यते॥**

अतः गुणशब्दोऽपि लोके अनेकेष्वर्थेषु व्यवह्रियते। यथा भाष्यकारेण प्रोक्तम्[17]– गुणशब्दोऽयं बह्वर्थः। अस्त्येव समेष्ववयवेषु वर्त्तते। तद्यथा– द्विगुणा रज्जुः, त्रिगुणा रज्जुरिति। अस्ति द्रव्यपदार्थकः, तद्यथा– गुणवानयं देश इत्युच्यते। यस्मिन् गावः सस्यानि च वर्त्तन्ते। अस्त्यप्राधान्ये वर्त्तते, तद्यथा– यो यत्राप्रधानं भवति स आह– गुणभूता वयमत्रेति। अस्त्याचारे वर्त्तते। तद्यथा– गुणवानयं ब्राह्मण इत्युच्यते, यः सम्यगाचारं करोति। अस्ति संस्कारे वर्त्तते। तद्यथा– संस्कृतमन्नं गुणवदित्युच्यते।

अथवा सर्वत्रैवायं गुणशब्दः समेषु अवयवेषु वर्त्तते। तद्यथा– द्विगुणमध्ययनं त्रिगुणमध्ययनमित्युच्यते। चर्चागुणान् क्रमगुणांश्चापेक्ष्य भवति, न संहिता-गुणांश्चर्चागुणांश्च। यद्येवं गुणवदन्नमिति गुणशब्दो नोपपद्यते। नह्यन्नस्य सूपादयो गुणाः समा भवन्ति। नावश्यं वर्ष्मतः परिमाणत एव वा साम्यं भवति। किं तर्हि? युक्तितोऽपि। आतश्च युक्तितः, यो हि मुद्‌गप्रस्थे लवणप्रस्थे प्रक्षिपेन्नादो युक्तं स्यात्। यदि तावददेरन्नं नादोऽत्तव्यं स्यात्। अथानितेरन्नं नादो जग्ध्वा प्राण्यात्।।

भाष्यकारः अत्र गुणशब्दस्य अनेकान् अर्थान् प्रदर्श्य गुणशब्दस्य मुख्यार्थः अवयव इति दर्शयति। अवयवानि च समानानि भवेयुः तथा च समानतायाः ज्ञानम् अन्यसाधनैः सह युक्त्याऽपि कर्त्तव्यम्। तच्च भाष्यकारेण लौकिकोदाहरणेन स्पष्टीकृतम्। अतः सर्वेषां वस्तूनामुपयोगः समतया एव भवितव्यं न तु विषमतया इति।

संस्कृतवाङ्मये गुणशब्दस्य अन्येऽपि अर्थाः प्रयुज्यन्ते, तद्यथा गुणशब्दस्य विशेषतादिष्वर्थेषु रघुवंशे गुणशब्दः प्रयुक्तः– रघूणामन्वयं वक्ष्ये ... तद्गुणैः



कर्णमागत्य।[18] गुणाः गुणानुबन्धित्वात्तस्य।[19] रज्जुः (धागा) इत्यादिष्वर्थेषु कुमारसम्भवे प्रयुक्तः गुणः मेखलागुणैरन्त[20], रशनागुणास्पद्।[21] धनुषः रज्जुः इत्यस्मिन्नर्थे गुणशब्दः प्रयुक्तः– गुणकृत्ये धनुषि नियोजिता।[22] विसतन्तुगुणस्य कारितं धनुषः पेलवपुष्पयत्रिणः।[23] कनकपिङ्गतडिदगुणसंयुतम्।[24] उपर्युक्तेषु त्रिषु स्थलेषु गुणशब्दस्य प्रयोगः धनुषः रज्जुः इति अर्थेषु प्रयुक्तः। शिशुपालवधमहाकाव्येषु मधुरवीणायाः अर्थे गुणशब्दः प्रयुक्तः यथा– या बिभर्ति कलवल्लकीगुणस्वान...।[25]

गुणशब्दस्य बह्वर्थत्वं विचारयामश्चेत् तदा अवगम्यते यद् बहुव्यापकोऽयं गुण-शब्दः, यतो हि दर्शनेषु, काव्यशास्त्रेषु, व्याकरणशास्त्रेषु पृथक् पृथगर्थेषु गुणशब्दस्य व्यवहारो भवति। वैशेषिकदर्शनस्य पदार्थेषु अन्यतमः गुणः यस्य चतुर्विंशतिः[26] भेदाः भवन्ति, साहित्यशास्त्रेषु काव्यप्रकाशे माधुर्य–ओजः–प्रसादाख्याः त्रयः गुणाः सन्ति।[27]

व्याकरणशास्त्रे पाणिनीयाष्टाध्यायां अदेङ् गुणः[28] सूत्रेण अ ए ओ इति वर्णानां गुणसंज्ञा भवति। सूक्ष्मदृष्ट्या अवलोकनेन ज्ञायते यत् अनेकार्थकः गुणशब्दः वर्त्तते यस्य सूत्रसन्दर्भे महर्षिणा प्रयोगः कृतः। व्याकरणशास्त्रे सूत्रव्याख्यानप्रसङ्गे अनेकैरुपायैः शङ्कासमाधानस्य या रीतिः दृश्यते सा मनोहरा, यतो हि महर्षिणा पतञ्जलिना सर्वत्रापि शुष्कस्थले तथ्यानां पाठकानां हृदि अवगमनाय लौकिकोदाहरणानि आदाय लौकिक-न्यायसहितं, बह्वर्थकशब्दानां ग्रहणपूर्वकं व्याकरणशास्त्रं सरलं वेद्यं च कृतवान्।

***

## सन्दर्भाः


1. महाभाष्यम्, 1.1.23
2. महा. प्र.भा., 7.1.95
3. महाभाष्यम्, 1.1.5
4. महाभाष्यम्, 2.4.74
5. महाभाष्यम्, 1.1.7
6. महाभाष्यम्, 1.2.64
7. महाभाष्यम्, 7.1.33
8. महाभाष्यम्, 1.1.20
9. हितोपदेशः, 1/149
10. रघुवंशम्, 1/44
11. भगवद्गीता, 8/19
12. भगवद्गीता, 9/8
13. मनुस्मृतिः, 2/215
14. भर्तृहरिशतकम्, 3/116
15. महाभाष्यम्, 5.1.119
16. वाक्यपदीयम्, 3/14/563
17. महाभाष्यम्, 5.1.119
18. रघुवंशम्, 1/9
19. रघुवंशम्, 1/22
20. कुमारसम्भवम्, 4/8
21. कुमारसम्भवम्, 5/10
22. कुमारसम्भवम्, 4/15
23. कुमारसम्भवम्, 4/29
24. रघुवंशम्, 9/48
25. शिशुपालवधम्, 4/57
26. वैशेषिकदर्शनम्, 11.6
27. काव्यप्रकाशः, अष्टम उल्लासः
28. अष्टाध्यायी, 1.1.2


***

## 'आरण्यक'स्य नियमाः

1. संस्कृतप्रसारपरिषद्, आरा-पक्षत इदं षाण्मासिकं शोधपत्रं संस्कृतेन चैत्र-आश्विनमासयोः (मार्च-सितम्बर) प्रकाश्यते। वर्षारम्भः चैत्रात् (मार्च तः)मन्यते।
2. ग्राहकत्वं पूर्णवर्षस्यैव स्वीक्रियते। मध्येवर्षं ग्राहकत्वं काङ्क्षतः पूर्णवर्षस्य शुल्कमपेक्ष्यते। तादृशाय ग्राहकाय वर्षस्य पूर्वप्रकाशितोऽङ्क उपलब्धौ सत्यां प्रेषयिष्यते।
3. वार्षिकं शुल्कम् एकशतं (100) रूप्यकाणि। एकस्याङ्कस्य शुल्कम् पञ्चाशत् (50) रूप्यकाणि। शुल्कप्रेषणस्योपायाः-

   **(i) NEFT Banking**

   Bank - Indian Bank, Ara (Bihar)
   IFSC - IDIB000A047
   Name - Sanskrit Prasara Parishad
   Acc. No. - 552203784

   शुल्कं संप्रेष्य तस्य सन्देशसूचना (Message) अत्र देया-
   डॉ. नीलमणि पाठकः, दूरभाषः 09431451895

   **(ii) बैंक ड्राफ्ट 'संस्कृतप्रसारपरिषद्'** इति नाम्ना आरा (बिहार) नगरे व्यवहरणीयम्।
   **ड्राफ्ट प्रोषणस्थलम् -** डॉ. नीलमणि पाठकः, गणपति ज्वेलर्स के पीछे, महावीर स्थान, मौलाबाग, आरा (विहार)-802301

   **(iii) धनादेशः** (M.O.) डॉ. नीलमणि पाठकस्य नाम्ना।
4. विमर्शात्मका अनुसन्धानात्मकाश्च शास्त्रीया अप्रकाशितपूर्वा उच्चस्तरीया गम्भीराश्च मौलिका निबन्धाः प्रकाशनाय गृह्यन्ते।
5. काव्य-नाटक-चरित्रवर्णन-व्यङ्ग्य-हास्यसम्बद्धा नव्या रचना अत्र स्थानं न लभन्ते।
6. प्रकाशनाय प्रेषिताः सर्वविधा रचनाः शुद्धा एकस्मिन् पत्रपृष्ठे सुस्पष्टाक्षरैः लिखिताः टङ्किता वा स्युः। रचनाऽन्ते रचयितुः आवाससङ्केतः पदनिर्देशश्च उल्लिखितौ स्याताम्।
7. प्रकाशितसंस्कृतकाव्यनाटकाऽऽलोचनादिग्रन्थानां समीक्षार्थं सम्बद्धग्रन्थस्य प्रतिकृतिद्वयं सम्पादकं प्रति प्रेषणीयम्।
8. लेखकेभ्यः तत्प्रकाशितलेखानां पञ्च प्रतिरूपाण्यपि दीयन्ते।
9. लेखानां प्रकाशनस्य सम्पादनस्य च सर्वाधिकारः सम्पादकाधीनः।
10. 'आरण्यक'सम्बद्धः लेखप्रकाशनसमीक्षादिविषयकः सर्वविधपत्रव्यवहारः **प्रो. गोपबन्धु मिश्रः, अध्यक्षः, संस्कृतविभागः, काशी हिन्दू विश्व-विद्यालयः, वाराणसी-221005 इति सङ्केतेन** दूरभाषः-0542-2310561, (चलः) 09450870788 विधेयः।
    Email-gopabandhuh@gmail.com